Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४५१४

Title कुण्ड मण्डप निर्णयः

Author श्री नीलकण्ठ भट्टः

Extent १८ Age १६५५

Subject धर्मशास्त्रं

[illegible]निर्णयः

४५१४

4514

F. = 18

नकल

॥ॐ॥ ॐ श्रीसवित्रे नमः ॥ श्रीरामगुरुगणेशेभ्यो नमः ॥ पोलीलयासंततनुते च विश्वं त्यालयत्यात्मनि विश्वरूपे ॥ लयं नयत्याशु च पूर्णरूपः शिवं तनो
तु पुरं विर्ममासौ ॥ श्रुतीः स्मृतीर्वक्ष्यपुराणजातं ततन्निबंधानपि सन्निबंधान् ॥ श्रीशंकरस्यात्मज एष दाने श्रीनीलकंठो विवृणोति कृत्यं
॥२॥ परस्वत्वोत्पत्त्यंतो द्रव्यत्यागो दानं ॥ व्यत्ययविनिमयादयस्त्वेतद्व्याप्याः स्वदानपदप्रयोगादिति केचित् ॥ परप्रयोगस्य भाक्तत्वान्न द्विन्नत्वेनापि
विशेषणीय इत्याहुः ॥ दामोदरठक्कुरस्तु क्रयादिवारयितुमदृष्टार्थत्वेन विशेषणीयं ॥ प्रीत्यादिदाने दानपदं गौणमित्यूचे तन्न ॥ सोमक्रयादिव्या
प्यावारणात् ॥ गौणत्वं मानाभावाच्च ॥ दूरस्थविप्राद्युद्देशेन त्यक्तस्यापहर्तृत्वेन प्रत्यवैत्येव ॥ ताहशापहारे शिष्टविगानेन निषिद्धकल्पनात् ॥ पर
स्वं नाददीतेत्येवमाकारकः प्रत्यवायस्तु निषेधो न प्रवर्तते ॥ अपहारदशायां कस्यापि स्वत्वाभावात् ॥ दातुः पुनरुत्पत्तौ तु मानाभावः ॥ रक्षणं तु
परकीयस्यापि प्रीत्यादिनोपपद्यत एव ॥ अभ्युद्देशत्यक्तपुरोडाशादाविवेति ॥ अन्यथा तत्रापि पुनरुत्पत्तिप्रयोजकस्विष्टकृदादिविध्यसांगत्वे पुन
रुत्पत्तिप्रसंगः स्विष्टकृदादिविधिसत्त्वे च पुनरुत्पत्तिर्नान्यथा ॥ त्यक्तोपादाने विगानादिति निरराधितं चरत्वादे ॥ नत्यागकाले स्वत्वापगमः किं
तु विप्रकर्तृकस्वीकारकाल इति तु कस्यचिद्ग्राहः तत्प्रलप उपेक्षणीय एव ॥ यत्तु देवलः ॥ अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनं दानमित्यभिनि
र्दिष्टं व्याख्यानं तस्य कथ्यते ॥ इति तद्वक्ष्यमाणसात्त्विकदानोक्तार्थं न दानसामान्यपरं ॥ इति दानस्वरूपं ॥ एतत्प्रशंसा सामवेदोपनिषदि ॥ दानेन
सर्वान्कामानवाप्नोति चिरंजीवित्वमिति ॥ व्यासः ॥ यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने ॥ तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ॥ य

...र्थमपिग्रासमर्थिभ्यः किं न दीयते। इच्छानुरूपो विभवः कदाकस्यभविष्यतीत्यादि। तच्च दानं त्रेधोक्तं भगवद्गीतासु ॥ दातव्यमितियद्दानं दीयतेनुप
कारिणे। देशेकाले च पात्रे च तद्दानं सात्विकं स्मृतं। यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः। दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतं ॥ अदेशकाले यद्दा
नमपात्रेभ्यश्च दीयते असत्कृतमवज्ञातं तत्तामसमुदाहृतं। विष्णुधर्मोत्तरे। तामसानां फलं भुंक्ते तिर्यक्त्वे मानवः सदा ॥ वर्णसंकरभावेन बाल्ये केचि
त्पुनः। बाल्ये वा दासभावे वा नात्र कार्या विचारणा। अतोन्यथा तु मानुष्ये राजसानां फलं भवेत् ॥ सात्विकानां फलं भुंक्ते देवत्वे नात्र संशयः। मात्स्ये।
श्रद्धापूर्वं कृतं कर्म सात्विकं मनुजोत्तम। पौरुषेण विना तेषां केषांचिद्दृश्यते फलं ॥ कर्मणा प्राप्यते लोके राजसस्य तथा फलं। कृच्छ्रेण कर्मणा विद्धि
तामसस्य तथा फलं। हारीतः। मुमूर्षुस्तामसं यच्चाप्रकृतो ददातीति ॥ अप्रकृतोऽसावधानः। गारुडे। अर्हते यत्सुवर्णादि दानं तत्काधिकं मतं ॥ अ
ग्नीनामभयं दद्यात्येतद्वै वाचिकं स्मृतं। विद्यामासाद्य यज्जप्येत्सदा नं मानसं द्विजाः इतिदानविकारस्तु चतुर्णामपि वर्णानां स्त्रीणां च ॥ वर्णानाम
श्रमाणां च चातुर्वर्ण्ये युधिष्ठिर। दानधर्मं प्रवक्ष्यामि यथा व्यासेन भाषितमिति व्यासोक्तेः। स च निषादस्थपतिवत्वैदिकमंत्रवत्स्वपि समंत्रक एव स्त्री
वि ४ शूद्रयोरकृतः। मदनरत्ने जातूकर्ण्यः। अधिकारिणो वै शूद्रः पूर्तधर्मे न वैदिके। पूर्तधर्मास्तत्रैव स्मृत्यंतरे ॥ वह्निर्वेदि च यद्दानं तत्पौर्तिकमुदाहृतं।
तत्रैव व्यासोपि। अंतर्वेद्यां च यद्दानमिष्टं तदभिधीयत इति ॥ अथ पात्रं ॥ याज्ञवल्क्यः। न विद्यया केवलया तपसा वापि पात्रता ॥ यत्र वृत्तमि
मे चोभे तद्धि पात्रं प्रचक्षत इति। व्यासः। प्रथमं तु गुरोर्दानं दत्वा ज्येष्ठमनुक्रमात्। ततोन्येषां तु विप्राणां दद्यात्पात्रानुरूपतः ॥ न विष्यत्तु
राणां। संनिधानस्थितान् विप्रान्दौहित्रं विद्पतिं तथा ॥ भागिनेयं विशेषेण तथा बंधून्गृहागतान् ॥ नातिक्रामेन्नरस्त्वेतान्सुमूर्खानपि

गोयते ॥ अतिक्रम्य महारौद्रं रौरवं नरकं व्रजेत् ॥ विद्धतिर्ज्ञ माता विष्णुः मातृष्वसा स्वसा चैव तथैव च पितृष्वसा ॥ मातामही भागिनेयी भागिने
यस्तथैव च ॥ दौहित्रश्चैव जामाता तेषु दत्तं मिहाक्षयं ॥ श्रेष्ठेषु तथा दत्तं तदक्षयमुच्यते ॥ मातापित्रोर्गुरोर्मित्रे विनीते चोपकारिणि ॥ दीनाना
थविशिष्टेभ्यो दातव्यं भूतिमिच्छता ॥ व्यासः । पितुः शतगुणं दानं सहस्रं मातुरेव च ॥ अनंतं दुहितुर्दानं सोदर्ये दत्तमक्षयं । एतत्प्रशंसामात्रं दत्तः
समम ब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे । सहस्रगुणमाचार्ये त्वनंतं वेदपारगे । व्यासः । ब्रह्मबीजसमुत्पन्नो मंत्रसंस्कारवर्जितः ॥ जातिमात्रोप
जीवी च भवेद् ब्राह्मणः स तु । गर्भाधानादिभिर्युक्तस्तथोपनयनेन च । न कर्म विन्न चाधीते स भवेद् ब्राह्मणब्रुवः । तथा देवार्चनं नं परो नित्यं वि
नाधीवत्सर त्रयं ॥ असौ देवलको नाम महव्यकव्येषु गर्हितः । यत्तु बृहस्पतिनाप्युक्तं समगुणं दानं वैश्ये तु द्विगुणं स्मृतं । क्षत्रिये त्रिगुणं प्रोक्तं
ब्राह्मणे तन्तु षड्गुणमिति शूद्रादीनामपि पात्रतोक्ता सा नाच्छादनपरा ॥ अन्नाच्छादनदानेषु पात्रं नैव विचारयेत् ॥ अन्नस्य क्षुधितः पात्रं वि
वस्त्रा वसनस्य चेति विष्णुधर्मोक्तेः । अपात्रायामंत्रकं दानं ॥ मंत्रपूर्वं तु यद्दानमपात्राय प्रदीयते दातुर्निकृत्य हस्तं तु अत्तु जिह्वां निकृंततीति
शाता तयोक्तेः ॥ तथा पस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषं । स वै दुर्ब्राह्मणो नाम यश्चैव • वृषलीपतिरिति अपात्रमित्यर्थः ॥ अथ देयादेये ॥ रामः
यथाविधेन द्रव्येण यत्किंचित् कुरुते नरः । तथाविधमवाप्नोति स फलं प्रेत्य चेह च । तथाविधं शुक्लेन शुद्धं ॥ शबलेन दुःखसंमिश्रं ॥ कृष्णेनासुखं २
द्रव्यं ॥ शुक्लादिस्वरूपं तु स्मरतौ । श्रुतशौर्यतपःकन्यायाज्यशिष्याच्च यागतं ॥ धनं सप्तविधं शुक्लमुदयोप्यस्य तद्विधः । कुसीदकृषिवाणिज्य
[illegible] शुल्कानुवृत्तितः ॥ कृतोपकारादाप्तं च शबलं समुदाहृतं पार्श्विकद्यूतचौर्यार्तिप्रतिरूपकसाहसैः ॥ व्याजेनोपार्जितं यत्तु तत्सर्वं पार्श्वि

लक्ष्मसुच्यत इति पार्श्वकं सर्वदा समीपस्थित्या सेवाप्रतिरूपकं वेषां तरग्रहणं ॥ शिवधर्मे ॥ तस्मात्त्रिभागं वित्तस्य जीवनाय प्रकल्पयेत् ॥ भागद्व
यं तु धर्मार्थमनित्यं जीवितं यतः । सर्ववित्तस्य भागपंचकं कृत्वा भागत्रयं जीवनार्थं भागद्वयं धर्मार्थमिति हेमाद्रिः ॥ भागत्रयं सर्ववित्तस्य तत्रैको भा
गो जीवनाय भागद्वयं धर्माय तत्पक्षे कृपणाशक्तविषये तु भारते । एकां गां दशगुर्दद्याद् दश दद्याच्च गोशती ॥ शतं सहस्रगुर्दद्यात् सर्वे समफला स्मृता
इति गोपदं वित्तमात्रोपलक्षणार्थं ॥ अन्यथा पंचगवादेः सहस्राधिकगवादेश्च गोदानेनधिकारः स्यादिति हेमाद्रिः पमः ॥ सुवर्णं रजतं ताम्रं [illegible]ति
स्योपः प्रयच्छति । न तत्फलमवाप्नोति तित्रैव परिवर्तीयतये कोचनं दत्वा दाता पिनरकं व्रजेत् । अपि शब्दात् गृहीतापि । अंगिराः । देवतानां गुरूणां
च मातापित्रोस्तथैव च ॥ पुण्यं देयं प्रयत्नेन नापुण्यं चोदितं क्वचित् ॥ तथा । पापदः पापमाप्नोति निरौरवं त्वगुणं सदा । पुण्यपदः पुण्यमाप्नोति शान्त
शोधसहस्रशः ॥ स्कांदे । आपत्स्वपि न देयानि नव वस्तूनि सर्वदा ॥ अन्वये सति सर्वस्वं दाराश्च शरणागताः । न्यासाधी कुलवृत्तिश्च निक्षेपः स्त्रीय
नं सुतः । योददाति संमूढात्मा प्रायश्चित्तैर्विशुध्यति । अंगिराः ॥ वहुभ्यो न प्रदेयानि गोगृहं शयनं स्त्रियः । विभक्ता[illegible]दक्षिणा ह्येता दातारं तारयं
ति हि । विभक्तदक्षिणा एव गद्दत्तानि गौरेकैकस्य दातव्या न बहुभ्यः कथंचन ॥ सा हि विक्रयमापन्ना दहत्यासप्तमं कुलं ॥ आग्नेयं स्कांदे अजिनं
मृतशय्यां च मेषां चोभयतोमुखीं ॥ कुरुक्षेत्रे च गृह्णानो न भूयः पुरुषो भवेत् । अग्राह्यं प्रकृत्य तत्रैव च ॥ हस्त्यश्वरथयानानि मृतशय्यासना
स्यः । अग्राह्या इत्यर्थः ॥ आसनं म तस्यैव । पद्मपुराणे ब्रह्मांडे भूमिदानं च ग्राह्यं नैकेन तद्भवेत् । अश्वं च मणिमातंगतिललोहानि वर्जये
दिति । वसिष्ठः । शस्त्रं विषं सुरा चाप्रतिग्राह्याणि ब्राह्मणस्य । हेमाद्रौ पाद्मे ॥ अतिदुःष्प्रेतशय्या न ग्राह्या द्विजसत्तमैः । गृहीतायां तु तस्या

नसुं नः संस्कारमर्हति ॥ यमः ॥ लोहं तिलाश्च महिषी तैलं लवणमेव च ॥ तिलधेनुर्मणिश्चैव घोराः स्युः प्रतिग्रहा इति ॥ मनुः ॥ हिरण्यं भूमिमश्वं गा-
मन्नं वासस्तिलान्घृतं ॥ अविद्वान्प्रतिगृह्णानो भस्मीभवति काष्ठवत् ॥ प्रतिग्रहसमर्थोपि प्रसंगं तत्र वर्जयेत् ॥ प्रतिग्रहेण विप्राणां ब्राह्मं
तेजो विनश्यति ॥ अथ कालाः ॥ वाराहे ॥ दर्शे शतगुणं दानं तच्चतुर्घ्नं दिनक्षये ॥ शतघ्नं तच्च संक्रान्तौ शतघ्नं विषुवे ततः ॥ युगादौ तच्छतगुणं अय-
ने तच्छताहतं ॥ सोमग्रहे तच्छतं तद्घ्नं रवेर्ग्रहे ॥ तच्छतघ्नं व्यतीपाते दानं वेदविदो विदुः ॥ विष्णुधर्मोत्तरे ॥ वैशाखी कार्त्तिकी माघी पूर्णिमा तु महा-
फला ॥ पौर्णमासीषु सर्वासु मासर्क्षसहितासु च ॥ स्नानानामिह दानानां फलं दशगुणं भवेत् ॥ यस्यां पौर्णेन्दुना योगं याति जीवो महाबलः ॥ पौ-
र्णमासी तु विज्ञेया महापूर्वा द्विजोत्तम ॥ स्नानं दानं तथा जप्यं अक्षय्यं वै तदा स्मृतं ॥ शंखः ॥ अमावास्या तु सोमेन सप्तमी भानुना सह ॥ चतुर्थी भू-
मिपुत्रेण सोमपुत्रेण चाष्टमी ॥ चतस्रस्तिथयस्त्वेतास्तुल्यास्तु ग्रहणादिभिः ॥ सर्वमक्षयमत्रोक्तं स्नानदानजपादिकं ॥ अमावास्याव्यतीपा-
तौ ग्रहणं चंद्रसूर्ययोः ॥ मन्वादयो युगादिश्च संक्रान्तिर्वैधृतिस्तथेत्यादि ॥ भारते ॥ रात्रौ दानं न शंसंति विना त्वभयदक्षिणां ॥ विद्यां कन्यां द्वि-
जश्रेष्ठ दीपमन्नं प्रतिश्रयं ॥ विनेति पदं विद्यादिष्वपि संबध्यते ॥ महामहानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयं ॥ स्नानं तत्र न कु[illegible]काम्यनै- रा३
मित्तिकाद्दते ॥ नेच्छंत्येके स्नानदानं रात्रौ मध्यमयामयोः ॥ नैमित्तिकं तदा कुर्यान्नित्यं तु न मनागपि ॥ उभयतोमुख्यां तु रदानादन्नदानादि-
कं तु सर्वदा भवतीति ॥ अर्धप्रसूतां गां दद्यात् कालादि न विचारयेदित्यादिना तत्र स्पष्टं ॥ अथ पुण्यदेशाः ॥ मनुः ॥ दृषद्वतीसरस्वत्योर्देवनद्यो-
र्यदन्तरं ॥ तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥ कुरुक्षेत्रं च मत्स्याश्च पंचालाः सूरसेनकाः ॥ एष ब्रह्मर्षिदेशो वै ब्रह्मा[illegible]वर्तादनन्तरः ॥

3

त्रि॰ गं॰ ४

मत्स्यो विराटदेशः॥ पंचालाः कान्यकुब्जाहिच्छत्रादिदेशाः॥ शूरसेनको मथुरादिदेशः॥ हिमवद्विंध्ययोर्मध्यं यत्प्राग्विनशनादपि प्रत्यगेव प्र
यागाच्च मध्यदेशः प्रकीर्त्तितः। विनशनं अंतर्द्धानं॥ भविष्यत्पुराणे॥ वाराणसी कुरुक्षेत्र प्रयाग पुष्कर गंगा समुद्रतीर नैमिषामरकंटक
श्रीपर्वत महाकाल गोकर्णादेवपर्वतादीनि पुण्यानीति॥ पाद्मे॥ लिंगं वा प्रतिमा वापि दृश्यते यत्र कुत्रचित्॥ तत्सर्वं पुण्यतां याति दानेषु
च महाफलं॥ भविष्योत्तरे। क्रोशमात्रं शिवस्य परमात्मनः॥ प्राणिनां तत्र यं चत्वं शिवसायुज्यकारकं॥ फलं दत्तहुतानां च अनंतं परि
कीर्त्तितं॥ मनुजैः स्थापिते लिंगे क्षेत्रमानमिदं स्मृतं॥ स्वयंभुवि सहस्रं स्यादार्षे चैव तदर्द्धकं॥ तथा गृहे दशगुणं दानं गोष्ठे चैव शताधिकं॥
पुण्यतीर्थेषु साहस्रमनंतं शिवसंनिधौ। मात्स्ये। शालग्रामसमुद्भूतः शैलः चक्रांकमंडितः। तिष्ठते यत्र वसुधे तत्र क्षेत्रं योजनत्रयं द्वार
वत्याः शिला देवि मुद्रिता मम मुद्रया॥ यत्रापि नीयते तत्स्यात् क्षेत्रं द्वादशयोजनमित्यादि॥ काशीखंडे॥ अन्यत्र यत्कृतं कर्म व्रतं
दानं तपो जपः॥ गंगातटेषु तत्सर्वं कृतं कोटिगुणं भवेत्॥ मात्स्ये॥ अग्निहोत्रिगृहे चैव यदल्पमपि दीयते॥ तदनंतफलं सर्वं भवतीति
विनिश्चयः॥ इति देशाः॥ प्रतिग्रहे देशनिषेधः पाद्मे न तीर्थे प्रतिगृह्णीयात्प्राणैः कंठगतैरपि ब्रह्मपुराणे। प्रवाहमवधिं कृत्वा यावद्धस्त
चतुष्टयं। तत्र न प्रतिगृह्णीयात्प्राणैः कंठगतैरपि दानधर्मे। भाद्रशुक्लचतुर्दश्यां यावदाक्रमते जलं। तावद्गर्भं विजानीयात्तदूर्द्ध्वं ती
रमुच्यते॥ ब्राह्मेपि॥ सार्द्धहस्तशतं यावद्गर्भं तत्तीरमुच्यते॥ स्कांदेपि। तीराद्गव्यूतिमात्रं तु परितः क्षेत्रमुच्यते इति॥ इदं च गंगायां॥
गर्भे प्रतिग्रहनिषेधः प्रसिद्धनदीषु॥ प्रसिद्धतरगंडक्यादिषु तु तीरेपि। गंगायां तु क्षेत्रेपीति सर्वशिष्टाचारः। अथ दानकृत्यं॥ मनुः॥

प्रथमः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते ॥ न सांपरायिकं तस्य दुर्मतेर्विद्यते फलं ॥ कात्यायनः ॥ कुशोपरि निविष्टेन तथा यज्ञोपवीतिना ॥ देयं
दा॰ प्रतिग्रहीतव्यं अन्यथा विफलं भवेत् ॥ स्मृत्यंतरे ॥ दद्यात्पूर्वमुखो दानं गृह्णीयादुत्तरामुखः ॥ आयुर्विवर्द्धते दातुर्ग्रहीतुः क्षीयते न तत् ॥ हेमा
४ द्रौ नामगोत्रे समुच्चार्य संप्रदानस्य चात्मनः ॥ संप्रदेयं प्रयच्छंति कन्यादाने तु पुंत्रयं ॥ शाखामप्युच्चारयंति शिष्टाः ॥ वस्त्रादिना विप्रं रंगं च व
कुर्वंति मध्यदेशे तथा नामगोत्रे समुच्चार्य सम्यक् श्रद्धान्वितो ददेत् ॥ संकीर्त्य देशकालादि तुभ्यं संप्रददे इति ॥ नम मेत्यपि कीर्त्तयंति शि
ष्टाः ॥ वाराहे ॥ सुस्नातः सम्यगाचांतः कृतसंध्यादिकक्रियः ॥ कामक्रोधविहीनश्च पाखंडस्पर्शवर्जितः ॥ दद्यादिति शेषः ॥ गौतमः ॥ अतर्जी
नुकरं कृत्वा सकुशं सतिलोदकं ॥ फलान्यपि च संधाय प्रदद्याच्छ्रद्धयान्वितः ॥ तथा नामगोत्रे समुच्चार्य प्राङ्मुखो देयकीर्त्तनात् ॥ उदङ्मुखा
य विप्राय दत्वा तं स्वस्ति कीर्त्तयेत ॥ सदेवताकदेयकीर्त्तनानंतरं दत्वेत्यर्थः ॥ देवलः ॥ प्रदाय शाकमुष्टिं वा यस्तु श्रद्धासमन्वितः ॥ महते पात्र
भूताय सर्वाभ्युदयमाप्नुयात् ॥ पात्रासंनिधाने नारदीये ॥ मनसा पात्रमुद्दिश्य जलं भूमौ विनिक्षिपेत् ॥ विद्यते सागरस्यांतस्तस्यांतो नैव विद्यते ॥
पात्रासंनिधानेप्यविप्रकरे दानं देयमिति धौम्यसंमतौ ॥ पात्रासंनिधाने अप्सु विनिक्षिपेदिति षड्विंशन्मते ॥ देयपात्रासंनिधाने तत्रैव विशेष उक्तः ॥ रामः
दुग्धपात्रं विकर्मस्थेत्परोक्षं दातुमुद्यतः ॥ तं ध्यायाद्धेमवं पात्रं दुग्ध्यमादित्यदैवतं ॥ तथा परोक्षे कल्पितं दानं पात्राभावे कथं भवेत् ॥ गोत्रजेभ्यस्त ४
द्दद्यात्तदभावे तु सर्वं धुवं ॥ गोत्रजाः पात्रस्य ॥ स्कांदे ॥ तस्मात्सर्वमुच्चार्य कार्ये दानप्रतिग्रहे ॥ याज्ञवल्क्यः ॥ प्रतिग्रहे सूनिचक्रिध्वजिवे
श्यानराधिपाः ॥ दुष्टदशगुणं पूर्वात्पूर्वादेते यथाक्रमं ॥ राजा शास्त्रातिक्रमवर्ती ॥ न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिन इति स्मृतेः ॥

तदपवादः॥ अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणः॥ अन्यत्र कुलटाषंढपतितेभ्यस्तथा द्विषः॥ तथा चांडालो जायते यज्ञकरणाच्छूद्रभिक्षितात्।
यस्त्वार्थं लब्ध्वमदद्ज्ञासः काकोपि वा भवेत् इति। यज्ञोद्देशेन न याचेतेत्यर्थः॥ प्रकारांतरेण लब्धेन यज्ञे कृते न दोषः॥ अत एव ज्ञापते वैश्यादेर्यज्ञो
द्देशेनापि याचनीयमिति। अथ प्रतिग्रहीतकृत्यं॥ आदित्यपुराणे। ॐ मकारमुच्चरन् प्राज्ञो द्विजः सकुशोदकं॥ गृह्णीयाद्दक्षिणे हस्ते तदंते स्वस्ति
कीर्तयेत्॥ पुराणांतरे॥ प्रतिग्रहीता सावित्रं सर्वत्रैवानुकीर्तयेत्॥ ततस्तु कीर्तयेत्सार्द्धं द्रव्येण द्रव्यदेवतां॥ समापयेत्ततः पश्चात्कामस्तु
त्या प्रतिग्रहं। तदंते कीर्तयेत्स्वस्ति प्रतिग्रहविधिस्त्वयं। सावित्रो देवस्य त्वा सवितुरित्यादिः॥ आदित्यपुराणे। प्रतिग्रहं पठेदुच्चैः प्रतिगृह्य द्विजो
त्तमात्॥ मंदं पठेत्तु राजन्यात् उपांशु च तथा विशि॥ मनसा तु तथा शूद्रे स्वस्तिवाचनमेव च॥ सोंकारं ब्राह्मणे कुर्यान्निरोंकारं महीपतौ॥ उपांशु च त
था वैश्ये मनसा शूद्रजे तथेति। प्रतिग्रहश्च दक्षिणहस्तमध्ये कर्तव्यः॥ हस्तमध्ये ब्रह्मतीर्थं दक्षिणे ग्रहणे तु तदिति स्मरणात्॥ तथा॥ प्रतिग्रहस्य
यो धर्मं न जानाति द्विजो विधिं। द्रव्यस्तेन्यसमायुक्तो नरकं प्रतिपद्यते। विधिं तु धर्मं विज्ञाय ब्राह्मणोस्तु प्रतिग्रहे॥ दाता सह नरत्येव महादुर्ग
तपसो ध्रुवमिति। याज्ञवल्क्यः॥ प्रतिग्रहसमर्थोपि नादत्ते यः प्रतिग्रहं॥ ये लोका दानशीलानां स तानाप्नोति पुष्कलानिति॥ अप्रत्याख्येयमाहस
एधः कुशाः शाकं पयो मत्स्या गंधाः पुष्पं दधिक्षितिः। मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च॥ तथा। एधोदकमूलफलमन्नमभ्युद्यतं च य
त्। सर्वतः प्रतिगृह्णीयात् मध्वथाभयदक्षिणामिति॥ तथा। आममांसं मधु घृतं धानाः क्षीरमथोदितं॥ गुडं तक्रं च संग्राह्यं निवृत्तेनापि शू
द्रतः। खलक्षेत्रगतं धान्यं वापीकूपगतं जलं॥ असाधोरपि तद्ग्राह्यं यच्च गोष्ठगतं पयः। इक्षुफलानि पिण्याकं प्रतिग्राह्याणि सर्वतः॥

दा० सस्यातिः॥ विवाहोत्सवयज्ञेषु त्वंतरा मृतसूतके॥ पूर्वसंकल्पितं ग्राह्यं न दोषः परिकीर्तित इति॥ अत्र विवाहोत्सवयज्ञेष्विति यजतिचु
५ घेय नाम हं करोति नानूयाजेष्विति वदुद्देश्य विशेषणमपि विवक्षितं। अन्यथा परिगणनं व्यर्थं स्यात्॥ अतोन्यत्र पूर्वसंकल्पितस्य सूतकादौ।
ग्रहणादोषएवेति द्रव्यदेवतास्तैत्तिरीये। सोमाय वासः रुद्राय गां। वरुणायाश्वं। प्रजापतये पुरुषं। मनवे तल्पं। त्वष्ट्रे ऽजां पूष्णेऽविः। नि
र्ऋत्या अश्वतरगर्दभौ। हिमवते हस्तिनं। गंधर्वाप्सरोभ्यः स्रगलंकरणे। विश्वेभ्यो देवेभ्यो धान्यं। वाचेन्नं। ब्रह्मण ओदनं। समुद्रायापः॥
उत्तानायांगीरसायानः। वैश्वानराय रथमिति। विष्णुधर्मोत्तरे। अभयं सहैवं देवत्यं भूमिर्वै विष्णुदेवता। कन्यादासस्तथा दासी प्राजाप
त्याः प्रकीर्तिताः तथा चैकसफं सर्वं कथितं यमदैवतं॥ महिषाश्चाः तथा याम्या उष्ट्रा वा नैर्ऋतो भवेत्॥ रौद्री धेनुर्विनिर्दिष्टा छागमाग्नेय
मादिशेत्। मेषं तु वारुणं विंद्याद्वराहं वैष्णवं तथा॥ आरण्याः पशवः सर्वे कथिता वायुदेवताः। जलाशयास्तु वारिधानी कमंडलु॥ कुंभं च
करकं चैव वारुणानि निबोधत। समुद्रजानि सर्वाणि वारुणानि द्विजोत्तमाः। आग्नेयं कनकं प्रोक्तं सर्वलोहानि चाप्यथ॥ प्राजापत्या
नि सस्यानि पक्वान्नमपि वै द्विज। ज्ञेयास्तु सर्वगंधा वै गांधर्वाश्च विचक्षणैः॥ बार्हस्पत्यं स्मृतं वासः सौम्या ज्ञेया रसास्तथा॥ पक्षिणश्च
तथा सर्वे [illegible] वायव्याः परिकीर्तिताः॥ विद्या ब्राह्मी विनिर्दिष्टा विद्योपकरणानि च॥ सारस्वतानि देयानि पुस्तकादीनि पंडितैः॥ सर्वेषां राम४
शिल्पिभांडानां विश्वकर्मा तु दैवतं॥ द्रुमाणामथ पुष्पाणां शाकैर्हरितकैः सह॥ फलानामपि सर्वेषां तथा ज्ञेयो वनस्पतिः। मत्स्यानां ५
सेवि निर्दिष्ट प्राजापत्यो न चैव च॥ छत्रं कृष्णाजिनं शय्यां रथमासनमेव च। उपानहौ च यानं च यच्चान्यत्प्राणिवर्जितं॥ तत्तु चांगिरस

त्वेनप्रतिगृह्णीतमानवः॥ भूतोपयोगियत्सर्वंशस्त्रवर्म्मध्वजादिकं॥ रणोपकरणांसर्वैविज्ञेयमर्वदेवतं। गृहंतुसर्वदैवत्यंदैवतुक्तंद्विजोत्त
मः विज्ञेयंविष्णुदैवत्यंसर्ववादिजसत्तमाः। हेमाद्रौ॥ यजुःपाठानंतरं॥ राजात्वावरुणोनयतुदेविदक्षिणे अमुकस्मै अमुकोतेनामृतत्वमश्यां
मयोदात्रेमयोमह्यमस्तुप्रतिग्रहीत्रेतवःकामस्कतिः॥ ॐमस्वस्तीतिविशेषः। विष्णुधर्मोत्तरे। भूमेःप्रतिग्रहंकुर्यातभूमिंकुर्वन्प्रदक्षिणां॥ करे
गृहीत्वाकन्यांतुदासदास्योद्विजोत्तमाः॥ करंतुहृदिविन्यस्यधर्म्मोज्ञेयःप्रतिग्रहः। आरुह्यतुगजस्यान्तःकर्णेचाम्बस्यकीर्त्तितः। तथाचैकश
फानांतुसर्वेषांचाविशेषतः। कर्णौप्रतिगृह्णीततान्शृंगेपुच्छेकृष्णाजिनंतथा॥ तान्एकशफलात्अत्रशृंगिणामेकशफानांशृंगेइतरेषां
तुकर्णइतिव्यवस्था॥ कर्णौजःपशवःसर्वेग्राह्याःपुच्छेविचक्षणैः॥ गृह्णीयान्महिषंशृंगेखरंवैपृष्ठदेशतः॥ प्रतिग्रहमथोक्ष्यमाणानांचाधिरो
हणात्॥ वीजानांमुष्टिमादायरत्नान्यादायसर्वतः। वस्त्रंदशांतादादद्यात्परिधायाथवापुनः। आरुह्योपानहौमंचं आरुह्येवतुपादुके॥ च
र्मध्वजौचसंस्पृश्यप्रविश्यचतथागृहं॥ अवतीर्यचसर्वाणिजलस्थानानिवैद्विजाः। ईषांवांतुरथोग्राह्यः छत्रंदंडेतथैववै॥ द्रुमांश्चप्रतिगृ
ह्णीयात्मूलन्यस्तकरोद्विजः। आयुधानिसमादायतथामुच्यविभूषणं॥ परिशिष्टेतु॥ प्रतिगृह्णीतगांपुच्छेकर्णेवाहस्तिनंकरे। भूर्द्विदासीमजे
वैवपृष्ठेश्वतरगर्दभौ॥ अश्वंकर्णेस्पृष्टेवापिअन्नमुद्दिश्यधारयेत्॥ शय्यासनंगृहंक्षेत्रंसंस्पृशादायकांचनं॥ उष्ट्रंचककुदेस्पृष्ट्वामृगां
[illegible]श्चमहिसाधिकान्॥ गोधामश्वविधानेनपुच्छेसंस्पृश्यपक्षिणः॥ दंष्ट्रिणोदंशिनश्चैवतथाकृष्णमृगाश्चये॥ अजाविनांचसर्वेषांए
षएवविधिस्मृतः॥ छत्रंसचामरंमूलेफलंसंगृह्यगौरवात्॥ प्रगृह्योपानहौमंत्रंवाचयेत्प्रतिमुच्यवै॥ वासस्त्व[illegible]यसमादायकन्यांशी

र्ष्य यवा करे परतिभार्यां परां पूर्वां प्रतिगृह्णीत चाद्दतां ॥ पुत्रमुत्संगमारोप्य प्रतिगृह्णीत दत्तकं ॥ रथं रथमुखे स्पृष्ट्वा प्रतिगृह्णीत कूबरे ॥ कूढं
दा० रो युगाधारं काष्ठं । युग्मकां चनवस्त्राणां नागपृष्ठे प्रतिग्रहः ॥ ॥ इति सामान्येतिकर्त्तव्यता निरूपणं ॥ ॥ अथ परिभाषा ॥ वामनपुराणे ॥ सर्वमं
६ गल्यमंगल्यं वरेण्यं वरदं शुभं ॥ नारायणं नमस्कृत्य सर्वकर्माणि कारयेत् ॥ भविष्ये · संकल्पेन विना विप्र यत्किंचित्कुरुते नरः ॥ फलं चाल्पाल्प
कं तस्य धर्मस्यार्द्धक्षयो भवेत् ॥ वसिष्ठः ॥ जपहोमोपवासेषु धौतवस्त्रधरो भवेत् ॥ अलंकृतः शुचिर्मौनी श्रद्धावान्विजितेंद्रियः ॥ याज्ञवल्क्यः ।
यदि वाग्यमलोपः स्याज्जपादिषु कथंचन ॥ व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययं ॥ स एव ॥ रौद्रपित्र्यासुरान्मंत्रांस्तथा चैवाभिचारिकान् ॥ व्या
हृत्यालभ्य चात्मानमपः स्पृष्ट्वान्यदाचरेत् ॥ कात्यायनः ॥ पित्र्यमंत्रानुद्रवण आत्मालंभेऽधमेक्षणे ॥ अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे
॥ मार्जारमूषकस्पर्शे आक्रुष्टे क्रोधसंभवे ॥ निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नुपः स्पृशेत् ॥ आत्मालंभो हृदयस्पर्शः सर्वकर्मणि विहित इति केचित् ॥
स्मृत्यर्थसारे ॥ कर्त्रंगानामनुक्तौ तु दक्षिणांगं भवेत्तथा ॥ छंदोगपरिशिष्टे ॥ यत्र दिङ्नियमो नास्ति जपादिषु कथंचन ॥ तिस्रस्तत्र दिशः प्रो
क्ता ऐंद्री सौम्यापराजिता ॥ तत्रैव ॥ आसीन ऊर्ध्वः प्रह्वो वा नियमो यत्र नेदृशः ॥ तदासीनेन कर्त्तव्यं न प्रह्वेण न तिष्ठतेति ॥ तथा ॥ पंचाश रामः
द्भिर्भवेद्ब्रह्मा तदर्द्धेन तु विष्टरः ॥ दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः ॥ तथा ॥ अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च ॥ प्रादेशमात्रं वि ६
ज्ञेयं पवित्रं यत्र कुत्रचित् ॥ तथा ॥ सदोपवीतिना भाव्यं सदा बद्धशिखेन च ॥ विशिखो व्युपवीतश्च यत्करोति न तत्कृतं ॥ विष्णुधर्मोत्तरे
॥ मंत्रेणोंकारपूतेन स्वाहांतेन विचक्षणः ॥ स्वाहावसाने जुहुयाद्ध्यायन्वै मंत्रदेवतां ॥ ब्राह्मे ॥ शमीपलाशन्यग्रोधप्लक्षवैकंकतोद्भवाः

[illegible] प्लक्षश्चोदुंबरौ बिल्वश्चंदनः सरलस्तथा। शालश्च देवदारुश्च खदिरश्चेति याज्ञिकाः॥ कर्मप्रदीपे॥ नांगुला दर्विका कार्या स
मित्स्थूलतया क्वचित्। न विशुष्का त्वचा चैव न सकीटा न पाटिता॥ प्रादेशान्नाधिका नोना न तथा स्याद्विशाखिका। न सपर्णी समित्का
र्या होमकर्मसु जानता॥ तथा॥ प्रागग्राः समिधो ग्राह्या अखर्वा नोष्ठपाटिताः। काम्येषु वश्यकर्मादौ विपरीता जिघांसतः। विशीर्णा वि
दला ह्रस्वा वक्रा बहुशिराः कृशाः। दीर्घा स्थूला घुणैर्जुष्टा कर्मसिद्धिविनाशकाः। वायुपुराणे। कंडनं पेषणं चैव तथैवोल्लेखनं तथा।
सकृद्देवपितॄणां स्याद्देवनांतत्त्रिरुच्यते। भविष्यपुराणे। भूमौ स्रुचं न पात्रेण विष्वक्चेन च पाणिना॥ वामेन यद्गु शार्दूल नांतरिक्षे तु हूयते। घ
नायुर्दारारेखासु सोमतीर्थे तु मध्यमं। लाजादिहवनं तेन कर्तव्यं वपनं तथा। वपनं निर्वापः। पाण्याहुतिर्द्वादशपर्वपूरिका। स्रुवादिना चे
त्स्रुचि पर्वपूरिका। देवेन तीर्थेन च हूयते हविः स्वंगारिणि स्वर्चिषि तत्र पावके। यो नर्चिषि जुहोत्यग्नौ व्यंगारिणि च मानवः। मंदाग्नि
रामयावी च दरिद्रश्चैव जायते। तस्मात्समिद्धे होतव्यं नासमिद्धे कथंचन। आरोग्यमिच्छता युष्मा श्रियमात्यंतिकीं तथा। जुहूषुश्च हुते
चैव पाणिशूर्पस्फ्यचादिभिः। न कुर्यादग्निधमनं कुर्याद्वा व्यजनादिना। मुखेनैव धमेदग्निं मुखाद्ध्येषोध्यजायत। नाग्निं मुखेनेति तु य
ल्लौकिके योजयंति तत्तद्बह्वृचपरिशिष्टे। अथावुधः सधूमे तु जुहुयाद्यो हुताशने। यजमानो भवेदंधः सपुत्र इति च श्रुतिः। मात्स्ये। होमो ग्र
हादिपूजायां शतमष्टोत्तरं भवेत्। अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते। छंदोगपरिशिष्टे॥ यन्नाम्नातं स्वशाखायां पारक्यमविरोधि
यत्। विद्वद्भिस्तदनुष्ठेयं अग्निहोत्रादिकर्मवत्॥ गृह्यपरिशिष्टे। बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रकीर्तितं। तस्य तावति शास्त्रार्थे कृते

कर्मप्र
का

सर्वं कृतं भवेत् ॥ प्रवृत्तमन्यथा कुर्याद्यदि होमो कथंचन ॥ यतस्तदन्यथा भूतं तत एव समापयेत् । अन्यथा भूतं विपर्यस्तं । समाप्ते यदि
जानीयान्मयैतदयथाकृतं । तावदेव पुनः कुर्यान्नावृत्तिः सर्वकर्मणः । प्रधानस्याक्रियायत्र सांगं तत् क्रियते पुनः । तदंगस्याक्रियायां तु ना
वृत्तिर्न च तत् क्रिया । तथा । दर्भाः कृष्णाजिनं मंत्रा ब्राह्मणा हविरग्नयः । अयातयामान्येतानि नियोज्यानि पुनः पुनः । लघुहारीतः चि
तौ दर्भाः पथि दर्भाः ये दर्भा यज्ञभूमिषु । स्तरणासनपिंडेषु षट् कुशान् परिवर्जयेदिति ॥ ब्राह्मे ॥ यथोक्तवस्त्वसंपत्तौ ग्राह्यं तदनुकारि यत् ।
यवानामिव गोधूमा व्रीहीणामिव शालयः । आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते । मंत्रस्य देवताया च प्रजापतिरिति स्थितिः । अनादेशे
7 ऽविधाने । प्राजापत्यमंत्रः समस्तव्याहृतय इति मदनः । स्मृत्यंतरेऽपि · न व्याहृत्या समंडुतं इति गारुडे प्रणवादि नमोंतं च चतुर्थ्यंतं च स
तमं । देवतायाः स्वकं नाम मूलमंत्रः प्रकीर्तितः । विष्णुधर्मोत्तरे । दध्यलाभे पयः कार्यं मध्वलाभे तथा गुडः । घृतं प्रतिनिधिं कुर्यात् पयो वाद
धि वान्नृप । सर्वाभावे यवः प्रतिनिधिरिति पैठीनसिनोक्तं । बौधायनः । पालाशाभावे खदिररौहितकौदुंबराणां मिध्मस्तदलाभे सर्व
वनस्पतीनां । बौधायनः । आज्यहोमेषु गव्यमेव भवेत् घृतं । तदभावे महिष्यास्त्र आजमाविकमेव च । तदलाभे तु कौसुंभं तदभावे तु
सार्षपं । याज्ञवल्क्यः । आर्षं छंदश्च दैवत्यं विनियोगं तथैव च । वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः । अविदित्वा तु यः कुर्याद्याजनाध्या
पनं जपं । होममंतर्जपादीनि तस्य चाल्पफलं भवेत् । आदित्यपुराणे । सुवर्णं रजतं मुक्ता राजावर्तं प्रवालकं । रत्नपंचकमाख्यातं शेषं वस्तु राम
ब्रवीम्यहं । स्मृत्यंतरे तु । कनकं कुलिशं नीलं पद्मरागं च मौक्तिकं । एतानि पंच रत्नानि रत्नशास्त्रविदो विदुरिति । तत्रैव । अभावे सर्वरत्नानां

हेमसर्वत्र योजयेत्। विष्णुधर्मोत्तरे। गायत्र्यादाय गोमूत्रं गंधद्वारेति गोमयं। आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि। तेजो
ऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकं। एभिस्तु पंचभिर्युक्तं पंचगव्यमिति स्मृतं। मदनरत्ने कात्यायनः। आज्यं क्षीरं मधु तथा मधुरत्र
यमुच्यत इति। ब्राह्मे। अश्वत्थोदुंबरप्लक्षचूतन्यग्रोधपल्लवाः। पंचभंगा इति प्रोक्ताः सर्वकर्मसु शोभनाः। पंचभंगाः पल्लवाः। चतुःसम
गारुडे। कस्तूरिकाया द्वौ भागौ चत्वारश्चंदनस्य च। कुंकुमस्य त्रयश्चैव शशिनश्च चतुःसमं। शशी कर्पूरः। कर्पूरं चंदनं दर्पं कुंकुमं च
मंशकं। सर्वगंधमिति प्रोक्तं समस्तसुरवल्लभं। तथा। कर्पूरमगरुश्चैव कस्तूरी चंदनं तथा। कंकोलं च भवेदेभिः पंचभिर्यक्षकर्दमः
छंदोगपरिशिष्टे। कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचंदनं। वचा चंपकमुस्तं च सर्वौषध्यो दश स्मृताः। पद्मे। इक्षवस्तृणराजं च निष्पावा
जाजिधान्यकं। विकारवच्च गोक्षीरं कुसुंभं कुंकुमं तथा। लवणं चाष्टमं तत्र सौभाग्याष्टकमुच्यते। तृणराजस्तालः। तत्पत्रं। अजाजीर
कं। विष्णुधर्मोत्तरे मुक्ताफलं हारितकं वैडूर्यं पद्मरागकं। पुष्परागं च गोमेदं नीलं गारुत्मतं तथा। प्रवालमुक्तायुक्तानि महारत्नानि वै नव
स्कांदे। दधिक्षीरं मध्वाज्यं च माक्षिकं लवणं गुडः। तथैवेक्षुरसश्चेति रसाः प्रोक्ता मनीषिभिः। भविष्यपुराणे। आपः क्षीरं कुशाग्राणि दध्य
क्षततिलास्तथा। यवाः सिद्धार्थकाश्चैव मर्घोऽष्टांगः प्रकीर्तितः। तत्रैव। सुवर्णं रजतं ताम्रं मारकूटं तथैव च। लोहं त्रपु तथा सीसं धात
वः परिकीर्तिताः। पंचरात्रे। रजांसि पंचवर्णानि मंडलार्थं हि कारयेत्। शालितंडुलचूर्णेन शुक्लं वा यवसंभवं। रक्तं कुसुंभसिंदूरगै
रिकादिसमुद्भवं। हरितालोद्भवं पीतं रजनीसंभवं क्वचित्। कृष्णं दग्धयवैर्हरितं पीतकृष्णविमिश्रितं। रजनी हरिद्रा। भविष्यपुराणे।

दूर्वा यवांकुरश्चैव वालकं चूतपल्लवा। हरिद्राद्वयसिद्धार्थशिखिपत्रोरगत्वचः। कंकणौषधयश्चैताः कौतुकाख्या नवस्मृता। इति
नवकौतुकानि। दशांगधूपो भद्ररत्ने गंधयुक्तो। षड्भागकुष्ठं द्विगुणो गुडश्च लाक्षात्रयं पंच नखस्य भागाः। हरीतकी सर्जरसः समां
सी भागैकमेकं त्रिलवं शिलाजं। घनस्य चत्वारि पुरस्य चैकं। धूपो दशांगः कथितो मुनींद्रैः। शिलाजं शैलेयं। घनो मुस्ता। पुरो गुग्गुलु
ः भविष्यत्पुराणे विशेषः। अनुक्तद्रव्यतत्त्वख्या देवताप्रतिमा नृप। सौवर्णी राजती ताम्री वृक्षजा मार्त्तिकी तथा। चित्रजा पिष्टले
पोढा निजवित्तानुरूपतः। आमाषा लेत्यपर्यंता कुर्त्तव्या शास्त्रवर्ज्जितैः। अंगुष्ठपर्वप्रभृति वितस्त्यवधिका स्मृतेति। तत्र दानांगं
देवताप्रतिमालक्षणानि तत्र वक्ष्यते। तुला वि देवताप्रतिमानां तु लक्षणानि। त्रिनेत्रो वृषभस्थश्च त्रिशूलधृक् कपालपा
णिश्चंद्रार्द्धभूषण ईशः। श्वेताश्वरथगः सोमो गदापाणिर्वरप्रदः। धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः। रक्तवर्णास्त्रिनयना द्विभु
जाश्चंद्रमौलयः। जटिलाश्च प्रकर्त्तव्या रुद्रा वाणधनुर्धराः। सुमश्मश्रुः सिंदूरारुणसप्रभः पद्मासनः पद्मकरो भूषितांगो रशनाध
रः सूर्यः। श्मश्रुलो रशनाधरा संदंशपाणि द्विभुजस्तेजोमूर्त्तिधरो महान् विश्वकर्मा। पीतांबरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्र
शांतो दंडकमंडलुधृक् सूत्रधृक् गुरुः। कमंडलुं स्रुवं चैव शक्तिं दर्भमपि क्रमात्। कल्पयेत्तं गिरोत्ताः कराग्राणि समंततः। पाणय
श्चाग्निर्नाम्नोपि कल्पयंति जपस्रजं। शक्तिं च पुस्तकं चैव क्रमाद्देवकमंडलुं। यज्ञोपवीती हंसस्थ एकवक्त्रश्चतुर्भुजः। अक्षस्रज
स्रुवं धत्ते कुंडिकां च प्रजापतिः। विश्वेदेवास्तु सर्वेपि दक्षिणे बाणपाणयः। कर्त्तव्याः कामपालौ तु सशरासनपाणयः। क्रतुर्दक्षो वसुः

सत्यः कालकामो धुरिलोचनौ। पुरूरवाद्रवश्चेति विश्वेदेवा दश स्मृताः। जगद्विधातृरूपं प्रजापतितुल्यं। चतुर्मुखत्वमात्रमस्याधिकं। पर्जन्यनामा विज्ञेयो गजवक्त्रचयान्वितः। योधत्ते सर्वजीवात्मा वरं जीवं च शेषकं। कुठारं च पयोजं च चितारत्नं महाशुचिं। पाशं चक्रं किसलयं कुंडीं च दशभिः करैः शुंभरीशतुल्यः। कुशविष्टरपद्मस्थाः पितरः पिंडपाणयः। पीताम्बरः पीतवपुः किरीटी चतुर्भुजो दंडधरश्च हारी। धर्मः सिंहकू सोमसुतः सदानः सिंहाधिरूढो वरदो बुधश्च। चतुर्वक्त्रश्चतुर्बाहुः सितमाल्यः सिताम्बरः। सर्वाभरणवान् श्वेतो धर्मः कार्यो महावपुः। चतुर्दन्तगजारूढो वज्रपाणिः पुरंदरः। प्राचीपतिः प्रकर्त्तव्यो नानाभरणभूषितः। द्विभुजौ देवभिषजौ कर्त्तव्यावश्ववाहनौ। तयोरोषधयः कार्या दिव्या दक्षिणहस्तयोः। वामयोः पुस्तकौ कार्यौ दर्शनीयौ तथा द्विजावरणः पाशभृत्सौम्यः प्रतीच्यां मकराश्रयः। मित्रः कमलपाणिश्च कमलासनसंस्थितः। द्विभुजः श्वेतमूर्त्तिश्च सर्वभूतहिते रतः। देवा एकोनपंचाशद्द्विवेंद्रसमतेजसः। भ्रातरः पुरुहूतस्य मरुतः सूर्यवर्चसः। किरीटहारकेयूरकटकादिविभूषिताः। खड्गचर्मधरा नित्यं शक्रस्यानुचराः सदा। ऊर्ध्वकेशं पिंगनेत्रं च गदिनं पीतविग्रहं। पुष्पकस्थं धनाध्यक्षं ध्यायेच्छिवसखं सदा। वरदो भक्तलोकानां किरीटी कुंडली गदी॥ कार्यः सुरूपो गंधर्वा धरतस्तथा। जलेशः पूर्ववत्। प्रदक्षिणं दक्षिणाधः करादारभ्य नित्यशः। विष्णुः कौमोदकीपद्मशंखचक्रैरलंकृतः। इति विष्णुलक्षणं। ब्रह्मवैवर्त्ते दानकालेषु देवत्वं प्रतिमानां प्रकीर्त्तितं। धेनूनामपि धेनुत्वं श्रुतं च फलदायिनः। दातुर्वै दानकाले तु धेनवः परिकीर्त्तिताः। विप्रस्य व्ययकाले तु द्रव्यं तदिति निश्चय इति। विष्णुधर्मोत्तरे। हैमराजततामाश्च मृन्मया लक्षणा

दी० ८

न्विगमपानोद्वाहप्रतिष्ठादौ नु कुंभास्स्युरभिषेचने। पंचाशांगुलवैपुल्या उत्सेधे षोडशांगुलाः। द्वादशांगुलकं मूलास्युर्मुखमष्टांगुलं भवेत्।
पंचचत्वाशाश्च पंचाशाः दशपंचाधिकशतमंगुलानि वैपुल्यमिति केचित्। पंचाशदंगुलमित्यन्ये। पंचाधिकाशाशाः पंचदशशता
वा वैपुल्यव्यासइतितुयुक्तं। तथा। कलशस्य मुखे ब्रह्मा ग्रीवायां च महेश्वरः। मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः। शेषा
स्तु देवताः सर्वा वेष्टयंति चतुर्दिशं। पृथिव्यां यानि तीर्थानि कलशे निवसंति हि। ग्रहाः शांतिश्च पुष्टिश्च प्रीतिश्च मातरेव चात्र ऋग्वेदश्च
यजुर्वेदः सामवेदस्तथैव च। अथर्ववेदसहिताः सर्वे कलशसंस्थिता इति। षड्विंशन्मते॥ यवगोधूमधान्यानि तिलाः कंगुस्तथैव
चाश्यामाकं चीनकं चैव सप्तधान्यमुदाहृतं। मार्कंडेयपुराणे। व्रीहयश्च यवाश्चैव गोधूमाः कंगु[illegible]कास्तिलाः। प्रियंगवः कोविदारा
ः कोरदूषाः सतीनकाः। माषामुद्गामसूराश्च निष्पावाः सकुलत्थकाः। आढक्यश्चणकाश्चैव सणाः सप्तदश स्मृतः। कोरदूषाः कोद्र
वाः सतीनकाः कलायाः। स्कांदे। यवगोधूमधान्यानि तिला कंगुकुलत्थकाः। माषामुद्गामसूराश्च निष्पावाः श्यामसर्षपाः। गवेधुका
श्च नीवारा आढक्योथ सतीनकाः। चणकाश्चीनकाश्चैव धान्यान्यष्टादशैव तु। श्यामाः श्यामाकाः। व्यासः। सुवर्णपरमं दानं सुवर्णं दक्षि
णापरा। सर्वेषामेव दानानां सुवर्णं दक्षिणोच्यते। परेत्फक्तैः पुरुषाहारपर्याप्तिकं तंडुलादिकमपि दक्षिणेति हेमाद्रिः। यत्त्वन्येषामेव दानानां
सुवर्णं दक्षिणा स्मृता। सुवर्णदीयमाने तु रजतं दक्षिणोच्यते। इति वचनं तन्मूलमृग्यं॥ सुवर्णरजतं ताम्रं तंडुला धान्यमेव च। नित्यश्रा
द्धं देवपूजा सर्वमेतद्दक्षिणामिति व्यासेन केवलसुवर्णदाने दक्षिणापर्युदासाच्च। अयं च पर्युदासः केवलसुवर्णदाने एव न तु सोव

एम ८

र्णं ब्रह्मांडादिदानइति मदनादयः। देयद्रव्यतृतीयांशं दक्षिणां परिकल्पयेत्। अनुक्तदक्षिणे दाने दशांशं वापि शक्तितः। तुलापुरु
षदानादीन्यधिकृत्य लिंगपुराणे। दक्षिणां च शतं सार्द्धं तदर्द्धं वा प्रदापयेत्। ऋत्विजां चैवेषांशं दे निष्कांश्च दापयेत्। भविष्योत्तरे। ज्ञेयं
निष्कशतं पार्थ दानेषु विधिरुत्तमः। मध्यमस्तु तदर्द्धेन तदर्द्धेनाधमः स्मृतः। मेषां च कालपुरुषे तथान्येषु महत्सु च। एवं वृहे रथे द्वे चर्मे
नोः कृष्णाजिनस्य च। अशक्तस्यापि कल्पेत्रयं पंच सौवर्णिको विधिः। इदं कल्पपादपे। रथे हिरण्याश्वरथे हेमहस्तिरथे च। अंडे ब्रह्मांडे धेनो
ः सुवर्णकामधेनोः। अतोऽल्पेन यो दद्यान्माहादानं नराधमः। प्रतिगृह्णाति वा तस्य दुःखशोकावहं भवेत्। अन्येषु महत्सु तिलगजादि
षु जपाभिषेकमभिधाय लिंगपुराणे। अष्टषष्टिपलोन्मानं दद्याद्वै दक्षिणां गुरोः। होतॄणां चैव सर्वेषां त्रिंशत्पलमुदाहृतं। अथवेदणां तद
र्द्धेन द्वारपानां तदर्द्धतः। अयं च गुर्वृत्विक्जापकद्वारपालानां अर्द्धार्द्ध दक्षिणाविभागो अनुक्तविभाग विशेषेषु दानांतरेष्वपि द्रष्टव्यः। ग्र
ह्यपरिशिष्टे दक्षिणालाभे मूलानां फलानां मत्स्यानां दक्षिणां ददातीति। अथ द्रव्यमानं॥ याज्ञवल्क्यः। जालसूर्यमरीचिस्थं त्रसरेणू रजःस्मृ
तं। तेऽष्टौ लिक्षास्तु तास्तिस्रो राजसर्षप उच्यते। गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः। कृष्णलः पंच ते माषस्ते सुवर्णस्तु षोडश। पलं सुव
र्णाश्चत्वारः पंच वापि प्रकीर्तितं। द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते। शतमानं तु दशभिर्धरणैः पलमेव तु। निष्कः सुवर्णाश्चत्वार इति। ध
रणपुराणौ पर्यायौ। तथा शतमानपले। पूर्वोक्ताश्चत्वारः सुवर्णा राजतो निष्क इति। कार्षिकस्ताम्रिकः पण इति ताम्रस्योन्मानं। पलचतुर्थां
शेन कर्षेणोन्मितः कार्षिकस्ताम्रसंबंधी पणो भवति। कार्षापणसंज्ञश्च स्मृत्यंतरेपि। षोडशपणः पुराणः पणो भवेत्काकिनीचतुष्कगणः। पं

प्रस्थः

दा०
१०

चा॰ते चतुर्भिर्वराटकैः काकिनी चैकेतित तथा च देशादिभेदेन पणो द्रव्यव्यवहारो ज्ञेयः। अथ धान्यादिमानं। भविष्यत्पुराणे। पलद्वयं
तु प्रसृतं द्विगुणं कुडवं मतं। चतुर्भिः कुडवैः प्रस्थश्चत्वार आठकः। आढकैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो बुधैः। कुंभो द्रोणद्वयं शूर्पः ख
री द्रोणास्तु षोडश। द्रोणद्वयस्यैव शूर्प इति संज्ञा। गोपथे। पंचकृष्णलको माषस्ते चतुःषष्टिभिः पलं। पले [illegible] द्वात्रिंशाड्डि प्रस्थो मागधेषु
प्रकीर्तितः। आढकस्ते चतुर्भिश्च द्रोणः स्याच्चतुराढकः। विष्णुधर्मोत्तरे। पलं च कुडवः प्रस्थ आढको द्रोण एव च। धान्यमानेषु बोद्धव्याः
क्रमशो मी चतुर्गुणाः। द्रोणैः षोडशभिः खारी विंशत्या कुंभ उच्यते। कुंभैस्तु दशभिर्वाहो धान्यसंख्या प्रकीर्तिता। विंशत्येत्यत्र द्रोणैरिति
संबध्यते। तथा च कुंभे द्रोणद्वयमिति पक्षो द्विंशतिद्रोणमितः कुंभ इति पक्षांतरं। पलसहस्रमितः कुंभ इत्यपि पक्षांतरं ज्ञेयं। वारा
हे। पलद्वयं तु प्रसृतं मुष्टिरेकपलं स्मृतं। अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौ च पुष्कलं पुष्कलानि च चत्वारि आठकः परिकीर्तितः। चतु
राढको भवेत् द्रोण इत्येतन्मानलक्षणं। एतत्पक्षाणां शक्तिदेशकालाद्यपेक्षया व्यवस्था॥ ॥उक्तं श्रीनीलकंठाख्यैः परिभाषादिकं पु
रः॥ दानाद्योपयिकं कुडं मंडपादिविदत्पय॥ तत्र भूमानं॥ आदित्यपुराणे॥ जालांतरगते भानौ यत्सूक्ष्मं दृश्यते रजः। प्रथमं तत्प्रमाणानां
त्रसरेणुं प्रचक्षते। त्रसरेणुस्तु विज्ञेयो अष्टौ ये परमाणवः। त्रसरेणव स्तेह्यष्टौ रथरेणुस्तु स स्मृतः। रथरेणवस्तेष्टौ च वालाग्रं तत्स्मृ
तं बुधैः। वालाग्राष्टकं लिक्षा तु यूका लिक्षाष्टकं तथा। अष्टौ यूका यवं प्राहुरंगुलं तु यवाष्टकं। अन्यत्रापि। यूकाष्टकं यवं प्राहुर्यवानामंगु
दरैस्तथा। अष्टभिश्चांगुलैतिर्यग्यवानामुत्तमं मतं सप्तभिर्मध्यमं प्रोक्तं षड्भिः स्यादधमांगुलमिति। द्वादशांगुलमात्रो वै वितस्तिस्तु प्रकी

द्रो
राम

र्त्तितः। अंगुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते। तालः स्मृतो मध्यमया गोकर्णश्चाप्यनामया। कनिष्ठया वितस्तिः स्यात् द्वादशांगुल[illegible]
मानिकः। रत्निस्त्वंगुलपर्वाणि विज्ञेयास्त्वेकविंशतिः। चत्वारिविंशतिश्चैव हस्तः स्यादंगुलानि तु। किष्कुः स्मृतो द्विरत्निस्तु द्विचत्वारिं
शदंगुलः। धृसवंत्यंगुलिश्चैव धनुर्दंडः प्रकीर्त्तितः। धनुर्दंडयुगं नालिर्ज्ञेया ह्येते यवांगुलैः। धनुषां त्रिशतं नल्वं आहुः संख्याविदो जना
ः। धनुःसहस्रे द्वे चापि गव्यूतिरपदिश्यते। अष्टौ धनुःसहस्राणि योजनं परिकीर्त्तितं। विष्णुधर्मोत्तरे। यदुत्पन्नमथाप्राप्तिनरः संवत्सरं
द्विजः। एकं गोचर्ममात्रं तु भुवः प्रोक्तं विचक्षणैः। बृहस्पतिः। दशहस्तेन दंडेन त्रिंशद्दंडा निवर्त्तनं। दशतान्येव गोचर्म ब्राह्मणेभ्यो ददा
तियः। इति भूमानं॥ मार्जनखननाद्यन्यतमप्रकारेण यथोचितं भूमिः संशोध्यतमैत्रेडपुस्थलं। सिद्धांतशेखरे। स्थलादर्कांगुलोच्छ्रायं मं
डपस्थलमीरितमिति। मंडपप्रकृत्य कपिलपंचरात्रे। उच्छ्रायो हस्तमानं स्यात्सुसमं च सुशोभनमिति। ततो दंडत्रयनिर्मितदीर्घत्रिको
णाकारयंत्रे दंडाग्राभ्यां भूविन्यस्ते यंत्रमूलात्तिर्यग्दंडोपरिलंबितमवोभारवद्भूमिमग्नं सूत्रं यथा तिर्यग्दंडमध्यचिह्ने पतेत्तदा निम्न
भूः पूर्वोच्चा वा खननीयेत्यादिशिल्पशास्त्ररीत्या तां शमीकृत्य च मंडपार्घ्यर्थं युक्तां प्राचीं साधयेद्देवीं। समायां भुवि द्वादशांगुलाधिक
व्यासार्द्धमेकं तन्मध्ये चापरं नवांगुलं व्यासार्द्धमिति वृत्तद्वयं कृत्वा तन्मध्ये द्वादशांगुलं पृथुमूलं सूक्ष्माग्रं ऋजुं शंकुं निधाय नवांगुल
वृत्तरेखायां च तस्रो दिशः प्रक[illegible]ल्प्यतां सुचतस्रोऽत्रज्याः पंचदशांगुलाः शलाकाः शंकुकाग्रस्पृष्टाग्राः स्थाप्याः। शंकुसाम्यतार्थं ता
दृशशंकग्रच्छायाच महद्वृत्तरेखां पूर्वाह्ने यत्र स्पृशति सा प्रत्यक्। यत्रापराह्ने सा प्राक्। सूक्ष्मप्राचीज्ञानार्थं तु परदिने पितस्मिन्नेव वृत्ते शं

रुच्छायानिर्गमप्रवेशयोश्चिह्नं कृत्वापूर्वापरदिनच्छायानिर्गमनचिह्नयोरंतरालमिष्टैस्त्रिचतुरा घैर्भागैर्विभज्यपूर्वदिनच्छा
याप्रवेशनिर्गमंतरालघटीःपादच्छायाघटीयंत्रादिनाज्ञात्वातामिर्घटिकाभिःकल्पितान्भागान्गुणयेत्पश्चाच्चहरेत्।ततोलब्धं
शेनपश्चाच्चामेवपूर्वदिनकृतापगमचिह्नादुत्तरायणेउत्तरास्मिन्दक्षिणायनेदक्षिणास्मिन्नंकयेत्।तदुपरिपूर्वच्छायाप्रवेशचिह्नो
पनिचष्टतेसूत्रेसूक्ष्माप्राचीभवति।दिक्ज्ञानोपायांतरंचमुक्ते।कृत्तिकाश्रवणःपुष्यश्चित्रास्वात्योर्यदंतरंएतत्प्राच्यादिशोरूपंयुगमा
त्रोदितेसतीति।अत्रायंगुरूपदेशः।ऋज्वीसूक्ष्मरंध्रांनलिकांकाष्ठादेर्घातद्वेणयुगमात्रमुपरिगतंकृत्तिकादिनक्षत्रंदृष्ट्वानलि
कांतान्यांप्राक्प्रत्यग्देशयोःसूक्ष्मंपाषाणद्वयमवलंबद्वयंवाभूमौप्रक्षिप्यतचिह्नयोःप्राचीसूत्रंदेयमितिएवमेवध्रुवंदृष्ट्वोदीचीसा
ध्याचित्रास्वात्यंतरालज्ञानार्थंतुनलिकाद्वयेनैकेनचदंडांतरेणग्रसलाकारयंत्रंकृत्वादंडंचमध्येकयेत्।नलिकाद्वयातीतंतुतेयातक्षणा
दिनापरस्परंयोजनीयोयथैकेनैवप्रयत्नेनयुगपन्नक्षत्रद्वयमपिदृश्यते।एवंदृष्ट्वामिलितान्नलिकाद्वयोर्न्तादंडमध्यांकंचपाषाणावलं
बौचप्रक्षेप्तव्याविति॥ ॥अथमंडपादिलक्षणं॥तत्रपंचरात्रे॥कनीयान्दशहस्तःस्यान्मध्यमोद्वादशोन्मितः।तथाषोडशभिर्हस्तैर्मंडपः
स्यादिहोत्तमः।प्रतिष्ठासारसंग्रहे।मंडपःकलाहस्तोवासर्वलक्षणसंयुतः।दशद्वादशहस्तोवाद्विद्विवृद्ध्याततःक्रमात्।लिंगपुराणेतुला
पुरुषदानप्रकरणे।विंशद्धस्तप्रमाणेनमंडपंकूटमेववा।अथाष्टादशहस्तेनकलाहस्तेनवापुनः।इतिविंशतिहस्तोप्युक्तः।मध्यस्तंभवलि
कोपरिगतैश्चतुर्भिरिष्टभिर्वामृदंगाकारकलशप्रोतैःकाष्ठैर्मध्येशिखराकारयुतःकूटं।कूटोस्त्रीशिखरंशृंगमित्यभिधानानुसारात्।

मध्यस्तंभोपरिस्तंभनयाच्छादितो मंडप इति हेमाद्रिः। संप्रतितु कूट एवादरो लोकानां तत्रैव च मंडपभ्रमः। दशहस्तमंडपस्तु एकमे-
खलकुंडपक्षे चोपयुक्तो भवतीति मदनरत्ने। पंचरात्रे। कुर्याद्वैष्णवयागेषु चतुर्द्वारांश्च मंडपान्। सारदारुमयीस्तंभान् दृढान् कु-
र्याद्दृढान् समान्॥ मंडपार्द्धोच्छ्रितान् वेदशंख्यां श्चूडान्वितांस्तथा॥ वलिकामूर्द्ध्वतस्तेषां स्तंभद्वादशकं पुनः। वाह्यपीठप्रमाणेन तत्र सूत्रवि-
भागतः। कल्पयेद्द्विरं द्वारं चतुरंगुलवर्द्धितः। मध्यमोत्तमयोर्वेदी मंडपस्य त्रिभागतः। चतुर्थांशोच्छ्रितिस्तस्या स्त्रिसप्तपंचतोपि वा। नवैका-
दशहानं वा इष्टकाभिः प्रकल्पयेदिति। चूडाशिखा। वलिकाभितेषां चतुःस्तंभानां शिखाभिः प्रोतच्छिद्राण्युभयतश्छिद्रद्वयोपेतानि व-
लिकाख्यानि तिर्यक्काष्ठानि विधेयानीत्यर्थः। वाह्यः। इत्यादि। आदौ मध्यस्तंभचतुष्टयं विन्यस्य तद्वाह्यपरिधौ मंडपक्षेत्रविस्तारपर्यायपी-
ठपरिमितसूत्रतृतीयांशेन तुल्यांतरद्वादशचिह्नकरणपूर्वकं पंचहस्तप्रमाणा द्वादशस्तंभा निखेया इत्यर्थः। तदेवं षोडशस्तंभता संपद्यते। ते-
षु चत्वारो मंडपायामार्द्धमितोच्छ्राया अष्टहस्ता नवहस्ता वा भवंति। अथवमसध्यमोत्तमरूपे षष्ठहस्ता एते चत्वारः शारदातिलके उक्तत्वा-
दिति तत्रापि मध्यस्तंभेषु चूडास्वेव तिर्यक्काष्ठनिवेशनं। वाह्येषु तु चूडासु स्तंभकोणेष्वेवेत्यनियमः। सर्वेच पंचमांशं न्यसेद्भूमौ सर्वसाधा-
रणो विधिरित्युक्तत्वात्। सूत्रपंचमांशेन निखेयाः। सर्वेपि दशांगुलसूत्रवेष्टनयोग्यस्थौल्या विधेयाः। कल्पयेदित्यादि। कनिष्ठमंडपे द्वारच-
तुष्टयं द्विहस्तविस्तारं। तथा मध्यमे चतुरंगुलाधिकद्विहस्तविस्तारं। एवमुत्तमे ऽष्टांगुलाधिकद्विहस्तविस्तारं। मध्यमोत्तमयोर्वेदीत्या-
दि। मंडपमध्यत्रिभागमाना वेदिः। स्वायामतृतीयं चतुर्थं पंचमसप्तमनवमैकादशान्यतमांशेनोच्चा। तुलापुरुषे तु मात्स्ये। सप्तहस्ताभ-

दी० १२
12
स

वेदीमध्ये पंचकरा थवेति। सिद्धांतशेखरे। चतुरस्रा चतुःकोणा वेदी सर्वफलप्रदा॥ तडागादिप्रतिष्ठायां पद्मिनी पद्मसंनिभा। राज्ञां
स्यात्सर्वतोभद्रा चतुर्भद्राभिषेचने। विवाहे श्रीधरी वेदी विंशत्यस्रसमन्विते। द्वारदेहल्या वहिर्हस्ते मात्रे द्वारशाखा निखेयाः। इति नि
बंधांतरे। व्रतखंडे तु हस्तद्वयं वहिस्त्यक्त्वा तोरणानि निवेशयेद्दिक्षु क्रं। मात्स्ये। द्वारेषु कार्याणि च तोरणानि चत्वार्यपि क्षीरवनस्पतीनां
मिति। अयमर्थः॥ पूर्वद्वारे अश्वत्थशाखा। दक्षिणे उदुंबरशाखा। पश्चिमे प्लक्षशाखा। उत्तरे तु वटशाखा। शाखास्त्वाधम मध्यमोत्तम मंडपे
षु क्रमात्पंच षट्सप्तहस्तोच्चास्तास्तंभमुपरिकृतचूडास्तु तिर्यक्फलकमुभयतः सच्छिद्रचूडान्यस्तच्छिद्रं निदध्यात्। तद्द्विहस्तमधमम मं
डपे। अंगुलषट्काधिकं द्विहस्तं मध्ये। सार्द्धहस्तद्वयमुत्तमे। तिर्यक्फलकोपरि मध्ये मंडपेषु क्रमात् चतुरंगुलाः सार्द्धचतुरंगुलाः पंचां
गुलाश्च कीला निवेश्याः तिर्यक्फलकं कीलाश्च तत्तत्काष्ठजा एव यद्वादशां [illegible] मस्तके द्वादशांशेन शंखचक्रगदांबुजं। प्रागादिक्रम
योगेन न्यसेत्तेषां स्वादारुजं। द्वादशांशोत्र फलकस्य चतुरंगुलादिरेवोक्तः। शंखचक्रगदांबुजाकारकरणं वैष्णवयागविषयं। शैवया
गे तु ते कीलास्त्रिशूलाभाः सुस्त्रिशूलाकारत्वं चैवं। मध्यकीलोच्चनवांगुलो वृत्तः सपादद्व्यंगुलविस्तारः। तमुभयतो न्यौ किंचिद्वक्रौ। दैर्घ्य राम
मध्ये शूलस्य मूलांगुलद्वयं बिले प्रविशति। इत्यधममंडपे। मध्यमे त्वेकादशांगुलमुच्छ्रायः पादोनत्र्यंगुलविस्तारः त्र्यंगुलो बिलप्रवेशः। १२
उत्तमे त्रयोदशांगुलउच्छ्रायः सपादत्र्यंगुलो विस्तारश्चतुरंगुलो विलप्रवेशः। इदं च पिंगलमते। शूलेन चिह्निताः कार्या द्वारशाखास्तंभमस्त
के। शूलेन वांगुले दैर्घ्यं तुरीयांशेन विस्तृतिः। ऋजु वै मध्यशृंगं स्यात्किंचिद्वक्रं च पक्षयोः। प्रथमं तत्समाख्यातं द्व्यंगुलं रोपयेत्तथेत्या

दिनोक्तं। एषामन्त्रानेमे एकवृक्षजानि तोरणानि। तस्याप्यसावेशमीदुमजानि एतन्निवेशनमंत्राश्चाग्निमीले इषेत्वा अग्नआयाहि शंनो
देवीरित्यनुसंधेयाः। मध्यस्तंभचतुष्टयोपरि चतुरस्राकृतिकाष्ठे दिग्विदिगंतरेष्वष्टकष्ठोताग्रकाष्ठाष्टकेनोत्र तता कार्या। कटैः सद्भिस्तुसं
छाद्या विजयाद्यास्तु मंडपाइत्यक्तत्वात् द्वारवर्जं सर्वतो मंडपश्चाच्छाद्यः। जयविजयभद्रविस्वरूप सुरूपकवचनदवन्वकसुप्रसन्नाः एते
षु हस्तादयो द्विहस्तवृद्धितो ज्ञातव्याः। यदा मंडपद्वयं क्रियते तदा तत्र प्रथममंडपपरिमितमंतरमुत्सृज्य द्वितीयो मंडपः कर्तव्य इति वास्तु
शास्त्रे। एवं यदा वामाग्रे मंडपः क्रियते तदा तद्धामपरिमाणमंतरमुत्सृज्य परतो मंडपो विधेय इति। मात्स्ये मंडपे पताका उक्ताः। लोकेशव
र्णापरितः पताका मध्ये ध्वजः किंकिणीकायुतः स्यादिति॥ संग्रहेपि। सप्तहस्ताः पताकास्युः सप्तमांशनविस्तृताः। लोकपालानुवर्णेनन
मीतुहिनप्रभा। पीतरक्तादिवर्णाश्च पंचहस्ताध्वजाः स्मृताः। द्विपंचहस्तैर्दंडैश्च वंशजैः संयुतास्तथेति। लोकपालवर्णा इंद्रः पीतो यमः श्या
मो वरुणः स्फटिकोपमः। कुबेरश्च सुवर्णाभो ह्यग्निश्चापि सुवर्णाभः। तथा निर्ऋतिः श्यामो वायुर्धूम्रः प्रशस्यते। ईशानस्तु भवेद्रक्त एवं
ध्यायेत्क्रमादिमानिति। गारुडेतु पताकानां प्रकारांतरमुक्तं। पंचहस्ताध्वजाः कार्या वैपुल्येन द्विहस्तकाः॥ सप्तहस्ताः पताकास्यु र्विंश
त्यंगुलविस्तृताः। दशहस्ताः पताकानां दंडाः पंचांशवेशिताः॥ सिंदूराः कर्बुरा धूम्रा धूसरमेघसंनिभाः॥ हरिताः पांडुवर्णाश्च शुद्धाः पूर्वा
दितः क्रमात्॥ एवं वर्णाः शुभाः कार्याः पताकाः पाकशासनेति। अत्र समचतुरस्रमंडपसाधनं मंडपादिव्यासप्रमाणां रज्जुं द्विगुणीकृत्य ता
मेवोभयतः पाशाभ्यां सहाष्टधा विभज्य पंचमांशांते कर्षणाय षष्ठांशांते शंक्वर्थं च चिह्नद्वयं कृत्वा मंडपादेः प्राचीसूत्रप्रांतद्वये शंकुद्व

दी॰ ९२

13

यं निखाय पश्चिमतः पाशेन तयोः शंक्वोरासज्य कर्षणाच्चिह्नं दक्षिणतस्तत्र शंकुं निखाय ततः कर्षणाच्चिह्नमुत्तरत आकृष्य शं
कु चिह्ने शंकुं निखाय व्यत्यासं कृत्वा शंक्वोः पाशांतादीसज्य पूर्ववद्दक्षिणोत्तरयोः क्रमेण कर्षणाच्चिह्नमाकृष्य शंकुद्वयं निहन्यात्। त
त ईशानाग्नेयादिशंकुषु प्रादक्षिण्येन रज्जुवेष्टनान्मंडपादि चतुरस्रक्षेत्रं सिद्धं भवति। मध्यवेदीसाधनं। मंडपक्षेत्रं प्रागायतं दक्षिणोत्तरा
यतं च त्रेधा विभज्य। तेन नवभागो मंडपः संपद्यते मध्यमेनेन वमेंशेत न्मानां वेदिका यजमानहस्तोच्छ्राया च विधेया। मात्स्ये। हारेषु कुंभ
यमत्र कार्यं स्व[illegible]पवृपा वररत्नयुक्तामिति। मत्स्यरत्ने। गंधपुष्पाद्युतोपेतानकुंभांस्तेषु निवेशयेत। कुर्वंतरं वाक्पतिं च विद्येशांतेषु पूज
येत। मंडपस्य तु कोणेषु कलशेषु क्रमाद नी। अन्ततो दुर्जयश्चैव वसिद्धार्थो मंगलस्तथा॥ पूज्या द्वारस्थकुंभेषु शक्रा घास्तन्मनूत्तमैः। मनुर्मंत्र
॥ इति मंडपनिरूपणं॥ ॥ अथ कुंडानि॥ ॥ तत्र भविष्यत्पुराणे। वेदीपादांतरं त्यक्त्वा कुंडानि वपंच वा। वेदास्त्राण्येव तानि स्युर्वर्तुला
न्यथवा क्वचित। आम्नायरहस्ये। कुंडानि चतुरस्राणि वृत्तनानाकृतीनि वा। नवपंचाथ वैकं वा कर्तव्यं लक्षणान्वितं। नवकुंडविधाने तु
दिक्षु कुंडाष्टके स्थिते। नवमं कारयेत् कुंडं पूर्वेशानदिगंतरे। विधाने पंचकुंडानामीशाने पंचमं भवेत। अत्र चतुःकुंडीपक्षे खातं तु
नास्तीत्यर्के हेमाद्रौ नारदीये। यत्रोपदिश्यते कुंडं चतुष्कं तत्र कर्मिणां विदां स्वमर्द्धचंद्रं च वृत्तं पद्मनिभं तथा। पीठवद्दर्तयेत्कुंडं सुप्रमाणे
ष[illegible]गर्तकं। कुर्यात्कुंडानि चत्वारि प्राच्यादिषु विचक्षणः। कुंडवेद्यंतरं चैव सपादकरसंमितं। विंशांगुलं प्रकर्तव्यं अंतरं कुंडपीठयोः।
स्मृत्यंतरे। वेदिभित्तिं परित्यज्य त्रयोदशभिरंगुलैः। हस्तमात्राणि कुंडानि चतुरस्राणि सर्वत इति सर्वतोष्टदिक्षु। कात्यायने तु ऐंद्यां संभे

राम
१३

चतुष्कोणं अग्नौ भोगे भगाकृति। चंद्रार्द्धं मारणे याम्ये त्रिकोणं द्वेषनैर्ऋते॥ वारुणे पा शांतिकं वृत्तं षडस्रमुच्चाटने निले। छदी चापो पेष्टिके
१ यं रौद्र्या मष्टास्त्रिमुक्तिदं। शारदातिलके। विप्राणां चतुरस्रं स्याद्राज्ञां वर्तुलमिष्यते वि[illegible]या नामर्द्धचंद्रा भं शूद्राणां त्र्यस्रमीरितं। चतुरस्रं
तु सर्वेषां केचिदिच्छंति तांत्रिकाः। चतुरस्रसाधनं तु मंडपसाधनावसरउक्तं। तत्रैकस्मिन् हस्ते चतुर्विंशत्यंगुलानि व्यासः। द्वयोस्त्रयस्त्रिं
शदंगुलानि सप्तयवाः। चतस्रो यूकाः द्वे लिक्षे। त्रिष्वेक चत्वारिंशदंगुलानि चत्वारो यवाः चतस्रो यूकाः चतस्रो लिक्षाः। चतुर्षु षष्टौ चत्वारिंश
दंगुलानि। पंचसु त्रिपंचाशदंगुलानि पंच यवाः द्वे यूके पंच लिक्षाः। षट्सु षट्पंचाशदंगुलानि। षट् यवाः द्वे यूके चतस्रो लिक्षाः सप्तसु त्रिषष्ट्यं
गुलानि यवत्रयं सप्त यूकाः सप्त लिक्षाः। अष्टसु सप्तषष्ट्यंगुलं सप्त यवाः लिक्षाश्चतस्रः। नवसु द्वासप्तत्यंगुलं दशसु पंचसप्तत्यंगुलानि। षड्य
वाः यूकाश्चतस्रः लिक्षाश्चतस्रः। एवं षोडशहस्तेषु षण्णवत्यंगुलानि। अथ योनिकुंडं। इष्टचतुरस्रव्यासं चतुर्विंशतिधा विभज्य सपादैः पंचभि
र्भागैर्मध्यसूत्रं प्राच्यां सवर्द्धचतुरस्रमध्ये प्रागुदक्सूत्रपात जातौ परितनान्त्यचतुरस्रयोः कोणसूत्रद्वयपातज्ञात मध्याद्दत्तकोणसूत्रार्द्ध
मानेनेष्टचतुरस्रोदक्सूत्रदक्षिणांतात् प्राक्सूत्रपश्चिमांतं यावत् [illegible] भ्रामयेत् वृत्तार्द्धं। एवमेवापरान्त्यचतुरस्रेपि इष्टचतुरस्रोदगंतात् प्रा
क्सूत्रपश्चिमांतं परिभ्राम्य वृत्तार्द्धद्वयदक्षिणोदक्कोटितो वर्द्धितप्राक्सूत्रांतं यावत्सूत्रद्वयं पातयेदिति कुंडं अत्रोपपत्तिः। प्राग्दिग्गतव्यस्रलं
बः सप्तदशांगुलानि १७ एको यवः १ एका यूका १ लिक्षाः पंच भूक्त इष्टचतुरस्रमध्योदक्सूत्रं चतुर्विंशत्यंगुलं वृत्तार्द्धव्यासार्द्धयोस्तत्रंगुला
नि अष्टौ ८ यवाश्चत्वारः ४ इति। योनिमध्यसूत्रस्थं अंगुलानि एक हस्ते पंचांगुलानि एको यव एका यूकाः पंच लिक्षाः। द्विहस्ते सप्तांगुला

दी० १४

14

निद्वौ यवौ [illegible] वौ द्वे यूके एका लिक्षा। त्रिहस्ते ष्टावंगुला० सप्त यवाः षट् तिस्रो यूकाः। चतुर्हस्ते दशांगुलानि चत्वारो यवाः तिस्रो यूकाः द्वे लिक्षे
। पंचहस्ते एकादशांगु० यवचतुष्टयमेका यूका। षड्ढस्ते द्वादशांगु० चत्वारो यवाः सप्त यूकाः तिस्रो लिक्षाः। सप्तहस्ते त्रयोदशांगु० पंच यवा
[illegible]। अष्टहस्ते चतुर्दशांगु० यवचतुष्टयं। यूकास्त्वतस्रः द्वे लिक्षे। नवहस्ते पंचदशांगु० यवत्रयं। यूकाचतुष्टयं। सप्त लिक्षाः। दशहस्ते
षोडशांगुलानि द्वौ यवौ तिस्रो यूकास्तिस्रो लिक्षाः। एवं षोडशहस्ते विंशत्यंगु० यवचतुष्टयं यूकाः चतस्रो लिक्षाः। रामस्तु दृष्ट्वा चतुरस्र
क्षेत्रमध्ये रेखाया द्विनवत्यधिकं शतमंशान् कृत्वा ष्टत्रिंशदंशांतमध्यसूत्रं प्राच्यां। एकोनविंशदंशे श्चोभयतः श्रोणिसंवद्धं सदृढं श्रो
णिचतुर्थांशकर्कटेन सूत्रेण वा पश्चिमभागवृत्तार्द्धद्वयं प्राक्सूत्रे श्रोणिसूत्रलग्नं विलिख्य वृत्तार्द्धद्वयवाह्यप्रान्तयोर्वर्द्धितप्राक्सूत्रद्वयेन
योन्याकारं कार्यमित्याह। तत्फलसंवादेपि विरूपत्वादयुक्तं। इदं चोदगग्रं कार्यं तच्च मध्ये रेखापंचमांशकद्वावुदीच्यां कृता याम भवति। इद
मुदग्गूतं मदनरते। योन्याख्यमुच्यते कुंडं आग्नेय्यामुत्तरामुखमिति। अथार्द्धचंद्राभं कामिके। चतुरस्रे नदे भंक्तैत्यका द्यंतौ तदंशको। म
ध्ये सप्तांशमानेन कुंडं खंडेंदुवत् भ्रमात्। अयमर्थः। इष्टप्रमाण चतुरस्रमध्ये रेखां नवधा विभज्याद्यंतिमौ भागौ परित्यज्य तत्र चिह्नद्वयं कृ
त्वोपरि चिह्नैस्तिर्यग्दक्षिणोत्तरं सूत्रं दत्वोपचिह्नाद्धश्चिह्नं यावत्कृतेन सूत्रेण कर्कटेन वा भ्रमात् कृतार्द्धज्यासूत्रजात कोटिकमर्द्धचंद्रकुंडं
कुर्यादिति। अर्द्धेंदौ व्यासार्द्धांगुलानि। एकस्मिन्नेकोनविंशत्यंगुलानि। एको यवः। एका यूका पंच लिक्षाः। द्वयोः सप्तविंशत्यंगुलानि
पंच यूकाः द्वे लिक्षे। त्रिषु त्रयस्त्रिंशदंगु० एको यवः द्वे यूके षट् लिक्षाः। चतुर्षु अष्टत्रिंशदंगु० द्वौ यवौ तिस्रो यूकाः द्वे लिक्षे। पंचसु द्विचत्वा

रिंशदंगु॰ सप्तयवाः पूर्वकोणस्थतस्वःतिस्रो लिक्षाः षट्सु षट्चत्वारिंशदंगुलानि शप्तयवाः द्वेयूके। सप्तसु पंचाशदंगुलानि पंचयवाः द्वेयू
के चतस्रो लिक्षाः अष्टसु पंचपंचाशदंगुलानि एकोयवः द्वेयूके तिस्रो लिक्षाः। नवसु सप्तपंचाशदंगुलानि चत्वारोयवाः। दशसु षष्ट्यंगु
लानि चत्वारोयवाः एवं षोडशसु षट्सप्तत्यंगुलानि पंचयवाः। अत्रारामेणतु चतुरशीत्यधिकत्रिशत्या विभक्तस्य क्षेत्रस्य व्यासस्यैकोंऽशो
विकल्प्याज्यः। क्षेत्रफल संवादार्थमित्युक्तं। सचैकांश इष्टक्षेत्रव्यासस्यचतुर्विंशांशषोडशांशो भवति। एकहस्तचतुरस्रेतु सार्द्धयवमितः एवं
द्विहस्तादिषप्यूह्यं। इदंचोदगग्रंकार्यं। तदुक्तं मदनरत्ने। उदगग्रं चादमध्यरेखायानववा विभागेन संपादनीयमिति। यत्तुशारदातिलके।
चतुरस्रीकृतं क्षेत्रं दशधा विभजेद्बुधः। एकमेकं त्यजेदंशं अर्धर्द्धं चतंत्रवित। ज्यासूत्रं पातयेदग्रे तन्मानात भ्रामयेत्ततः। अर्द्धचंद्रनिभं कुंडं र
म्यमिदं भवेदितितस्य भूयान क्षेत्रफलविसंवादः कामिकोक्तेवल्यः॥ ॥अथत्रिकोणं॥ ॥इष्टचतुरस्रमध्यसूत्रस्य चतुर्विंशतिरंशाः
तत्र सूत्रचपश्चात्यां मष्टमांशोनैकांशसहितान्सार्द्धसप्तांशान पंचदशांशांश्च पार्श्वयोः प्रत्येकं सपादान्षडंशान संवर्ध्य वर्द्धितश्रोण्यंतयोर्वर्द्धितप्रा
क्सूत्रांतं यावत्सूत्रद्वयेदत्ते सममुजस्त्रिभवतियथोक्तं। शारदातिलके। चतुर्थांमेदितेक्षेत्रेन्यसेदुभयपार्श्वयोः। एकैकमंशंतन्मानादग्रतो
लांछयेत्ततः। सूत्रत्रयंबुधः कुर्यात्र्यस्रं कुंडं भवेद्धृतमिति इदंतुकिंचित्फलव्यभिचारि अतोस्माभिरधिकवृद्धिरुक्ता। रामभतेतु मध्यसूत्रंद
शभिरंशैः संवर्ध्य तत्रिकोणः स्वाष्टमांशोनःश्रोणिसूत्रस्यो भयतः पंचपंचांशवृद्धिरितितत्तु विषमभुजत्वादुपेक्ष्यं। इदंचनिर्ऋतौ प्रागग्रं
पश्चिमयोनिव्यस्त्रिभुजाः एकस्मिन्षड्विंशदंगुलानि चत्वारोयवाः द्वयोरेकपंचाशदंगुलनिपंचयवाः त्रिषुत्रिषष्ट्यंगुला॰ एकोयवः चतुर्षुत्रि

दा०
१५
15

सप्तत्यंगुलानि। पंचस्वेकाशीत्यंगुलानि पंच यवाः षट्स्वेकोननवत्यंगुल त्रयो यवाः सप्तसु चतुर्नवत्यंगुल चत्वारो यवाः अष्टसु अ
न्तरशतांगुल एको यवः नवसु नवाधिकशतांगुला यवत्रयं। दशसु पंचदशाधिकशतांगु यवद्वयं। अथ वृत्तं। इष्टचतुरस्रव्यासषोड
शांशाधिकव्यासार्द्धमितेन कर्कटेन सूत्रेण वा कृतं मंडलं वृत्तकुंडं प्रागग्रं पश्चिमयोनि प्रकृतौ वृत्तव्यासार्द्धांगुला एकस्मिन् त्रयोदशांगु
लानि यवचतुष्टयं। द्वयोरेकोनविंशत्यंगुला एको यवः त्रिषु त्रयोविंशत्यंगुल यवचतुष्टं सप्तविंशत्यंगु एको यवः। पंचदशसु त्रिंशदंगुला
द्वौ यवौ। षट्सु त्रयस्त्रिंशदंगुलानि एको यवः सप्तसु पंचत्रिंशदंगुलानि सप्त यवाः अष्टस्वष्टत्रिंशदंगुल द्वौ यवौ। नवसु चत्वारिंशदंगु पंच
यवाः दशसु द्विचत्वारिंशदंगुलानि सप्त यवाः। अथ षडस्रं। इष्टचतुरस्रमध्यसूत्रस्य चतुर्विंशतिभागान् कृत्वा तत्सूत्रं त्रिभिरंशैः प्राच्यां च
द्वयेत ततस्त्रैकोंशः स्वाष्टमांशोनः तावच्च प्रतीच्यां संवर्द्धयेत तदर्द्धेन वृत्तं कृत्वा तावतैव कर्कटेनोदीचीमारभ्य षट्सु स्थानेषु अंकयेदिति। अथ पर
द्मं। इष्टचतुरस्रमध्यसूत्रस्य चतुर्विंशतिरंशाः। तत्र द्वादशभिरंशैरेकं वृत्तं कृत्वा तदुपरि सार्द्धान् त्रीनंशान् संवर्द्ध्यापरं कृत्वा तत्र दिक्षु विदिक्षु त
दंतरालेषु च सूत्राण्यास्फालयेत। ततो नष्टेऽन्तरे रेखा प्राक्सूत्रमत्स्यादेकांतरितमत्स्यान् सूत्रद्वयेन त्रिकोणाकारेणास्फालयेत् तदंतरालमत्स्यसमसू राम १५
वहिर्वृत्तरेखागतमत्स्यपार्श्वतत्तच्चैकं सूत्रं समांशतया मध्येकयित्वा सूत्रार्द्धमितकर्कटकोटिमेकां मध्यांके परां च सूत्रारंभकमत्स्ये संस्थाप्य त्रिको
णमध्ये भ्रमणादेकं मत्स्यं वहिर्वृत्तरेखागतत्रिकोणांतात् तस्मादेव च सूत्रांकात् त्रिकोणाद्बहिरपरं मत्स्यं कृत्वा तं मत्स्यात् त्रिकोणाद्बहिरुपरि सूत्रा
र्द्धज्याकमेकं बहिर्मत्स्यात् त्रिकोणांतरस्थः सूत्रार्द्धज्याकमपरमिति संलग्नकोटिकमुपर्यधोभावेन चतुर्द्वयं कार्यं एवमपरसूत्रेऽपि कृत्वा सूत्र

दृष्यमार्जनेवक्राग्रंपद्मदलवत्त्यात्रं भवति· एवमन्यान्यपिपत्राणिकृत्वाइष्टचतुरस्रक्षेत्रकल्पितचतुर्विंशत्यंशमध्येत्रिभिरंशैर्व्यासार्द्धेनमध्येत
द्विहिस्य षडंशव्यासार्द्धेनापरेपिद्वेवृत्तेकार्येति चांतर्वृत्तेविस्तारेतद्वृत्तेनोच्चतायांतव्यासेनसमुदाकर्णिकाकार्या। बहिर्वृत्तेकेशराइति। अ
थैतत्फलं। तत्रैकस्मिन्पत्रेउपरितनेमहतित्र्यस्रेतावत्। लंबोंऽगुलानिदशत्रयोयवाः ३ सप्तयूकाः ७ त्रीणिवालाग्राणि ३ पंचरथरेणवः ५ पंच
त्रसरेणवः ५ चत्वारःपरमाणवइति ४। भूस्तुनवांगुलानि ९ एकोयवः १ तिस्रोयूकाः। षट् लिक्षाः ६ त्रीणिवालाग्राणि ३ द्वौरथरेणू २ त्रयस्त्र
सरेणवः ३ सप्तपरमाणवइति ७ लंबेनतद्भूम्यर्द्धगणनेफलं। पंचाशदंगुलानि ५० सप्तयवाः ७ द्वेयूके २ द्वेलिक्षे २ षड्वालाग्राणि ६ द्वौरथरेणू २
एकस्त्रसरेणुः १ चत्वारःपरमाणवइति ४। अथवातनेल्पत्र्यस्रेभूःसेवलंबस्तुचत्वार्यंगुलानि ४ चत्वारोयवाः ४ पंचयूकाः ५ सप्तलिक्षाः ७ एकं
वालाग्रंपंचरथरेणवः ५ एकस्त्रसरेणुःसप्तपरमाणवः ७ इति। पूर्वोक्तभूम्यर्द्धेनैतल्लंबगणने। फलंएकविंशतिरंगुलानि २१ पंचयूकाः ५ पं
चलिक्षाः ५ एकंवालाग्रं १ पंचरथरेणवः ५ षट्त्रसरेणवः ६ त्रयःपरमाणवइति· अस्यद्वयफलैक्यकरणेद्वासप्ततिरंगुलानि ७२ पत्राग्रवक्रता
यांतुतावत्येवभूस्त्यज्यतेतावत्येवसंगृह्यतइतिगणितंक्षेत्रफलमविहतं। अष्टानामपिपत्राणांक्षेत्रफलमेलनेंगुलानांषट्सप्तत्यधिकापं
चशती ५७६। अथाष्टास्रांइष्टचतुरस्रेचतुर्विंशतिभागाः तत्रद्वाभ्यांभागाभ्यामेकभागचतुर्थांशाधिकाभ्यांमध्यंसूत्रंमेवध्यमध्याद्वयं
तथ्तत कर्कटेनवृत्तेकृत्वेशानपूर्वांतरालमारभ्यैकादशभिरंशैर्मितेनसूत्रेणाष्टसुस्थानेषुचिह्निते अष्टास्रंभवति। अत्रचैकादशांशः स्वाष्टमांशो
नःकार्यअत्रैवकृतादग्वुपपत्तिः। मध्येसमच[illegible]तुरस्रंतद्दुगमानंतु। विंशत्यंगुलानि ९ एकोयवोयूकात्रयंचचतुरस्रचतुर्भा

गेषु चत्वारिंश्यस्त्वा॥ तत्र भुवश्चतुरस्रभुजा एव। पूर्वोक्तांकसूत्रमितावेव च द्वौ भुजौ। लंबावानां चैतु त्वार्यंगुलानि। एको यवो द्वे यूके इति तत्र चतु
रस्रफलं चत्वारिंशतानि सप्तचांगुलानि यवाश्च सप्त ४०।७। प्रत्येकं त्र्यस्रफलं द्विचत्वार्यंगुलानि ४२ त्र्यस्रचतुष्टयफलमष्टषष्ट्यधिकं शतं १६
८ रामोक्तं त्वष्टास्रं विषमवक्रभुजं त्वा षोडशास्रता पते त्र्योपेत्स्यमिति दिक्॥ अष्टास्रे भुजांगुलानि। एकस्मिन्नृशांगुलानि सप्तयवाः। द्वयोः पंच
दशांगुलानि त्रयो यवाः। त्रिषु त्वष्टादशांगुलानि सप्त यवाः चतुर्ष्वेकविंशत्यंगुलानि सप्तयवाः। पंचसु चतुर्विंशत्यंगुलानि यवत्रयं। षट्सु षड्विंशत्यंगु
लानि षट् यवाः। सप्तस्वष्टाविंशत्यंगुलानि शप्तयवाः अष्टसु त्रिंशदंगुलानि सप्त यवाः। नवसु द्वात्रिंशदंगुलानि षड्यवाः। दशसु चतुस्त्रिंशदंगुला
नि। यव चेतुष्टयं। षोडशसु त्रिचत्वारिंशदंगुला· पंच यवाः॥ ॥अथ चतुर्विंशांशाः॥ एकस्मिन्नेकांगुलं त्रयो यवाः त्रिष्वप्येकांगुलं षट् यवाः चतु
र्ष्वंगुलद्वयं। पंचस्वंगुले यवद्वयं। षट्सु त्र्यंगुलद्वयवत्रयं। सप्तस्वंगुलद्वयं पंचयवाः। अष्टस्वंगुलद्वयं षड्यवाः नवस्वंगुलत्रयं दशस्वंगुल
त्रयमेको यवः षोडशसु चत्वार्यंगुलानि। एकहस्तादिषु चतुर्थांशाः॥ एकस्मिन्षडंगुलं। द्वयोरष्टांगुलानि चत्वारो यवाः त्रिषु दशांगुलानि
16 यवत्रयं। यूकाश्चतस्रः चतुर्षु द्वादशांगुलानि पंचसु त्रयोदशांगुलानि त्रयो यवाः यूकाश्चतस्रः। षट्सु चतुर्दशांगुलानि षड्यवाः सप्तसु
पंचदशांगु[illegible] सप्तयवः अष्टसु षोडशांगुलानि। सप्त यवाः चतस्रो यूकाः। नवसु त्वष्टादशांगुलानि सप्तयवाः षट् यूकाः षोडशसु चतुर्विंशत्यंगु
लानि॥ ॥अथाष्टमांशाः॥ एकस्मिन्नंगुलत्रयं। द्वयोश्चत्वार्यंगुलानि। द्वौ यवौ। त्रिषु पंचांगुलानि। द्वौ यवौ। चतुर्षु षडंगुला· पंचसु षडंगुलानि
षट् यवाः षट्सु सप्तांगुला यवत्रयं। सप्तस्वष्टांगुला· अष्टस्वष्टांगुलानि यवचतुष्कं नवसु नवांगुलानि। दशसु नवांगुला· चत्वारो यवाः। षोडश

मि ८

सुद्वादशांगुला॥ अथ षष्टांशाः॥ एकस्मिन्नंगुलचतुष्टयं। द्वयोः पंचांगुलानि। पंचयवाः तिस्रो यूकाः। त्रिषु षडंगुलानि। सप्तयवाः च
तस्रो यूकाः। चतुर्षु सप्तांगुलानि चत्वारो यवाः पंचयवाः। पंचयूकाः। षट्सु नवांगुलानि षड्यवाः चतस्रो यूकाः। सप्तयु[illegible]ष्टांगुला निचत्वा
रो यवाः पंचयूकाः। अष्टस्वेकादशांगुलानि द्वौ यवौ। चतस्रो यूकाः। नवसु द्वादशांगुलानि० दशसु द्वादशांगुलानि पंचयवाः षोडशसु
षोडशांगुलानि। द्वादशांशाः॥ एकस्मिन्नंगुलद्वयं। द्वयोर्द्वेऽंगुले। सप्तयवाः। त्रिष्वंगुलत्रयं। यवचतुष्टयं। चतुर्षु [illegible] चत्वार्यंगुला- पंचसु चत्वार्यं
गु- चत्वारो यवाः षट्सु चत्वार्यंगुलानि सप्तयवाः। सप्तसु पंचांगु- द्वौ यवौ। अष्टसु पंचांगुला- पंचयवाः। नवसु षडंगुलानि। दशसु षडं
गुलानि यावत्रयं। षोडशस्वष्टांगुला- स्थापने सर्वकुंडानां ध्वजायः सर्वसिद्धिदः इत्यकृत्वा सर्वेषु चैतेषु प्रोक्तमानाद् द्व्यंगुलयवादिन्यू
नमतिरिक्तं वा कृत्वा ध्वजायः साधनीयः विस्तारे दैर्घ्यंगुणिते रष्टभिर्विभक्ते यद्येकः परिशिष्यते तदा ध्वजाय इति॥ तदुक्तं। ध्वजो धूम्रोऽथ सिंह
श्वा सौरमेयः खरो गजः। ध्वांक्षश्चेति क्रमेणैतदायाष्टकमुदाहृतं इति। भविष्यत्पुराणे। मुष्टिमाने शतार्द्धे तु शते चारत्निमात्रकं। सहस्रेल
घ होतव्ये कुर्यात्कुंडं करात्मकं। द्विहस्तमयुते तद्वल्लक्षहोमे चतुःकरं। अष्टहस्तात्मकं कुंडं कोटिहोमेषु नाधिकमिति। यत्तु शारदाति
लके। एकहस्तमितं कुंडं एकलक्षे विधीयते। लक्षाणां दशकं यावत्तावद्धस्तेन वर्द्धयेत्। दशहस्तमितं कुंडं कोटिहोमे प्रशस्यत इति य
त्तु स्कांदे। कोटिहोमे चतुर्हस्तं चतुरस्रं समंततः। योनिवक्त्रद्वयोपेतं तदप्याहुस्त्रिमेखलमिति। चालक्षादिहोमे ष्वेकहस्त्यादिकुंडविधानं।
कोटिहोमे दशहस्तस्यत द्यथोचितं व्रीह्यादि चिरदाहि स्थूलद्रव्यविषयं घृतादि क्षिप्रदाहि द्रव्यविषयं च ज्ञेयं॥ ॥अथ वातं॥ तत्र होम

दा० ९७
17

चूडोत्तरे॥ ॥चतुर्विंशतिमं भागमंगुलं परिकल्पयेत्तु। चतुर्विंशांगुलं हस्तं कुंडानां परिकल्पयेत्। हस्तमानं रवने त्तिर्यक् ऊर्ध्व मेखला सह
॥पिंगलमते। वातादिकांगुलं त्यक्त्वा मेखलानां स्थितिर्भवेत्। तथा। सर्वेषामेव कुंडानामेका वाति स्तथैव सा॥ कुंडलक्षणविवृतौ। कुंडांगुलो
द्वहिः कार्या मेखलैकैकषडंगुलेति। चतुस्त्रिद्व्यंगुला वापि तिस्रः सर्वत्र शोभनाइति। मेखलात्रितयं कार्यं कोणराम यमांगुलेति। चतुस्त्रिद्व्यं
गुला वापि तिस्रः सर्वत्र शोभनाइति। मेखलात्रितयं कार्यं कोणरामयलैरिति। कोणाश्चत्वारः रामास्त्रयः यमौ द्वौ। चतुस्त्रिद्व्यंगुलत्वं च वि
स्तारे भवतायां च। अत एव शारदातिलके। मेखलामानं प्रकृत्य विस्तारोत्सेधतो ज्ञेयाः मेखलाः सर्वतो बुधैरिति। रामेणत्विति स्तरणमपित्र्यंगु
लो भवतैव। विस्तारस्तु चतुस्त्रिद्व्यंगुल इत्यक्तं॥ ॥अथ योनिः। तत्र स्वायंभुवे। मेखलामध्यतो योनिः कुंडार्द्धत्र्यंशविस्तृता। अंगुष्ठमानो
ष्ठकंठा कार्याश्वत्थदलाकृति कुंडार्द्धदीर्घा त्र्यंशविस्तृता मूले अग्रे श्वत्थदलवत्कुंचिता अंगुष्ठमानौ ओष्ठकंठौ यस्याः सा। अंगु
ष्ठमानोष्ठकंठा ओष्ठः कुंडमध्यप्रविष्टो न्यग्रकंठो योनिर्मेखलेत्यके। तथा च भुवि वेष्टिता योनिः कार्येत्यर्थः। मेखलातउच्चो भाग इति यरे।
त्रैलोक्यसारे। दैर्घ्यात्स्वर्णांगुलो नायोनिस्त्र्यंशोणि विस्तरेणतु॥ एकांगुलोच्छ्रिता सा तु प्रविष्टाभ्यंतरे तथा। कुंभद्वयसमायुक्ता चाश्वत्थद
लवन्मता। अंगुष्ठमेखलायुक्ता मध्ये ला ज्यधृति च्छमेति। त्र्यंशो नायोनिर्दैर्घ्यात् अंगुष्ठांगुलेति यावत्। कुंभद्वयेन वृत्ताई द्वया कारेण मू
लदेशे समायुक्ता॥ शारदातिलके॥ स्थलादारभ्य नालस्याधो न्यामध्यस्तरं घ्रकमिति। प्रागग्नियाम्य कुंडानां प्रोक्ता योनिरुदङ्मुखी। पूर्वा
मुखाः स्मृताः शेषा यथा शोभासमन्विता। त्रैलोक्यसारे। नवमस्यापि कुंडस्य योनिर्दक्षदलेस्थितेति। शारदायां योनिकुंडे योनिमध्य

राम ९

कुंडे नाभिं चैव वर्जयेदिति ॥ सिद्धांतशेखरेपि । योनौ योनिं न कुर्वीतेति । शारदातिलके । कुंडानां कल्पयेद्धन्ना भिमंबुजसंन्निभां । तत्तत्कुंडा-
नुरूपी वामानमस्या निगद्यते । मु[illegible]रत्नै कहस्तानां नाभिरुत्सेधतो मता । नेत्रवेदांगुलोपेता कुंडेष्वन्येषु वर्द्धयेत । यवद्वयक्रमेणैव ना-
भिं पृथगुदारधीरिति । नेत्रवेदांगुलोपेताच्चतायां द्व्यंगुलविस्तारायामयोश्चतुरंगुलेत्यर्थः । द्वित्रिहस्तादिकुंडेषु द्विद्वियववृद्धिस्तु विस्ता-
रायामयोः षष्टांशविस्तार[redacted] पद्ममध्ये सत्वरजस्तमः । तन्मध्ये स्थापयेद्देवान्ब्रह्माद्यांश्च सुरासुरानपि ॥ अथ ग्रहपूजाप्रकार
: तत्र ग्रहमात्स्ये । सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः । शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहा नव । स्कांदे । जन्मभूगोत्रमेतेषां वर्णं स्थान-
मुखानि । यो ज्ञात्वा कुरुते शांतिं ग्रहास्तेनावमानिताः । स्थानमधिष्ठानं । एतद्विज्ञाय यः कुर्यात्तत्सर्वं सफलं भवेत । वर्णजन्मनी आह वृद्ध-
पराशरः । रक्तः कश्यपजो भानुः शुक्लो ब्रह्मसुतः शशी । रक्तो रुद्रसुतो भौमः पीतः सोमसुतो बुधः । पीतो ब्राह्मः सुराचार्यः शुक्लः शुक्रो भृगूद्व-
हः । कृष्णः शनी रवेः पुत्रो कृष्णो राहुः प्रजापतेः । कृष्णः केतुः कृशानूद्भवः कृष्णाः पापास्त्रयो यमी । भुच माह स एव । उत्पन्नोर्कः कलिंगेषु यु-
मुनायां च चंद्रमाः । अंगारकस्त्ववंत्यां तु मगधायां हिमांशुजः ॥ सैंधवेषु गुरुर्जातः शुक्रो भोजकटे तथा । शनैश्चरस्तु सौराष्ट्रे राहुर्वैराटि-
के पुरे । अंतर्वेद्यां तथा केतुरित्येता ग्रहभूमयः । गोत्रमाह । स एव । आदित्यः काश्यपो गोत्रादात्रेयश्चंद्रमा भवेत् । भारद्वाजो भवेत्कुजो भस्त-

द्वितीये षष्टौ । तृतीये विंशतिः । चतुर्थे चतुर्विंशतिः । पंचमे तु षट्त्रिंशदिति । पंचकोणात्मकं पीठपादचतुष्टयमाग्नेयादिक्रमेण पारक्तहरितश्यामसितैः पूरणीयं कोणकोष्ठयं प्रत्येकं त्रिभिस्त्रिभिर्वर्णैरिति त्रि[illegible]
इति षोडशारचक्र[illegible] निर्मितिः । इदमेव च वारुणं मंडलं ॥ तथा वज्रं शृंगु[illegible]मे भागे आग्नेय्यां शक्तिमुज्वलां । आलिखेद्दक्षिणे दंडं नैर्ऋत्यां खड्गमालिखेत । पाशं तु वारुणे कोणे [illegible]ध्वजं वै वायुगोचरे कौबेर्यां तु
लिखेदीशान्यां शूलमालिखेत । शूलस्य वामदेशे तु चक्रं पद्मं तु दक्षिणे इति । ततो महावेद्युपरि पंचवर्णफलपुष्पोपशोभितं वितानं बध्नीयादिति । ततो महावेदीशानभागे आयामे [illegible] कुर्यात् [illegible]
दिस्थापनार्थं परा वेदि[illegible] विहितास्ति हेमाद्रिमते वितस्त्यर्कया वात स्त्री सर्वतोभद्रं लिखेत । तद्वेदनप्रकारो पीठे । प्रागुदीच्यां गतारेखाः कुर्याद्रेकोनविंशतिः । खंडेंदुस्त्रिपदैः कोणे [illegible]
[illegible] पदैः । चतुर्विंशत्पदा वापीपरिधिर्विंशकैः पदैर्मध्ये षोडश [illegible] महद्दलं स्मृतं । श्वेतं [illegible] लोवल्ली नीलेन पूरयेत । भद्रोऽसितासिता वीथी [illegible]

च

पराः द्वि

नं. ४५१४

घांत्रेयभ्र्स्तोमजः । शाकपूज्योंगिरोगोत्रः शुक्रोवै भार्गवस्तथा । शनिः काश्यपएवायराहुः पैठीनसिस्तथा ॥ केतवोजैमिनीया स्युग्रहालोकपा
हितावहाः । उक्ताययां द्वादशांशपरेति ॥ शारदातिलके । एकमेव भवेत्कुंडं ईशान्यां वैसवाद्यर इति विश्वकर्मा ॥ खाताधिके
भवेद्रोगी हीने धेनुधनक्षयः ॥ वक्रकुंडेतु संतापोमरणं छिन्नमेखले । मेखलारहिते शोको भ्यधिके वित्तसंक्षयः ॥ भार्या
विनाशनं प्रोक्तं कुंडे योन्या विनाकृते । अपत्यध्वंसनं प्रोक्तं कुंडं यत्कंठवर्जितमिति । सिद्धांतशेखरे । मानहीने महाव्या
धिरधिके शत्रुवर्द्धनं । योनिहीनेत्वपस्मारो वा कुष्ठः कंठवर्जिते । तत्रैव । स्थंडिलं वापि कुर्वीत सुसिद्धं सिकतैः सि
तैः सितैः । हस्तमात्रं प्रविस्तारं सुसमे त्र्यंगुलोन्नतं । ग्रंथांतरेपि । नित्यनैमित्तिकं होमं स्थंडिले वा समाचरेत् ॥ ह
मात्रेणात कुर्यात्वालुकाभिः सुशोभनं । अंगुलोत्सेधसंयुक्तं चतुरस्रं समंततइति ॥ ॥ इति श्री शूं क
रभद्यात्मजभट्टनीलकंठकृत कुंडमंडपनिर्णयः ॥ संवत् १७५५ वर्षे पौषशुक्लेत्रयोदश्यांभोमत्रवाउ
मृजरा मात्मज उदयरामेण अर्गला पुरमध्ये कीतं ॥